महारुद्रपद्धतिः काश्मीरी
हितव्रता

॥५६॥

काशीदीक्षितकृतमहारुद्रपद्धतिः प॰ ७४ श्लो॰ २२५०

नं॰ ५६

१

ॐ श्री गणेशाय नमः ॥ अथ रुद्रविधानं ॥ तत्र प्रशंसा ॥ तत्र जावालोपनिषत् ॥ अथ हैनं ब्रह्मचारिण ऊचुः किं जप्येनामृतत्वं ब्रूहीति स होवाच याज्ञवल्क्यः । शतरुद्रियेणेति एतानि वा अमृतानीति नामधेयानि एतैर्वा अमृतो भवतीति कैवल्योपनिषदि । यः शतरुद्रियमधीते सोग्निपूतो भवति सुरापानात्पूतो भवति ब्रम्हहननात्पूतो भवति कृत्याकृत्यात्पूतो भवति तस्मादविमुक्तमाश्रितो भवत्याश्रमी सर्वदा सकृद्वा जपेत् ॥ अनेन ज्ञानमाप्नोति संसारार्णवनाशनं । तस्मादेवं विदित्वैव कैवल्यफलमश्नुते इति ॥ पद्मपुराणे शिवगीतायां शिववाक्यं ॥ यस्तु रुद्रं जपेन्नित्यं ध्यायमानो ममाकृतिं ॥ षडक्षरं वा प्रणवं निष्कामो विजितेन्द्रियः । अथवाथर्वशिरसं मंत्रं कैवल्यं वा रघूत्तम । स तेनैव च देहेन शिवः संजायते ध्रुवं ॥ तथाह याज्ञवल्क्यः ॥ सुरापः स्वर्णहारी च रुद्रजापी जले स्थितः सहस्रशीर्षजापी च मुच्यते सर्वकिल्विषैः ॥ शंखः ॥ सर्वपापहरा ह्येता रुद्रैकादशनीस्तथा । वेदमेकगुणं जप्त्वा तदन्हैव विशुध्यति ॥ अत्र्यंगिरसौ ॥ एकादशगुणान्वापि रुद्रानावर्त्य धर्मवित् । महापापैरपि स्पृष्टो मुच्यते नात्र संशयः ॥ सूतसंहितायाम् ॥ यः श्रद्धया युतो नित्यं शतरुद्रियमभ्यसेत् । अग्निदाहात्सुरापानाद्दुःकृत्याचरणात्तथा । मुच्यते ब्रम्हहत्याया इति कैवल्यशाखिनः ॥ वायुपुराणे ॥ यश्च रुद्रं जपेन्नित्यं ध्यायमानो महेश्वरं । यश्च सागरपर्यन्तां सशैलवनकाननां । सर्वरत्नगुणोपेतां सवृक्षजलशोभितां ॥ सर्वत्र गुणसंपन्ने ब्रम्हणे वेदपारगे । दद्यात्कांचनसंयुक्तां भूमिमोषधिसंयुतां । तस्माद[illegible]धिकं तस्य सकृद्रुद्रजपाद्भवेत् । मम भावं समुत्सृज्य यस्तु रुद्रं जपेत्सदा ॥ स तेनैव तु देहेन रुद्रः संजायते ध्रुवं ॥ जपेनानेन विधूतदुःखाः भू[illegible]पाश्चान्ये द्विजातयः ॥ हित्वैव सकलेवापं

शिव ३

चमकं नमकं चैव पौरुषं सूक्तमेव च ॥ नित्यं त्रयं प्रयुंजानो ब्रह्मलोके महीयते ॥ चमकं नमकान् होतृं पुरुषं सूक्तं जपेन्सदा ॥
प्रविशेन्स महादेवं गृहं गृहपतिर्यथा ॥ भस्मदग्ध शरीरस्तु भस्मसायी जितेंद्रियः । सततं रुद्रजाप्यो सौ परां मुक्तिरवाप्स्यति
॥ रुद्राध्यायी वसेद्यत्र ग्रामे वा नगरे पिवा । न तत्र क्षुत्पिपासार्त्या दुर्भिक्षव्याधयोपि च ॥ कालिकापुराणे ॥ यः पुनः सततं
भक्त्या भ्यर्च्य शशिशेखरं ॥ जपं ध्याय त्सदा रुद्रान्सो पियाति परं पदं ॥ पृथ्वीं सागरां सो हि कृत्स्नां शैलवनान्वितां ॥
दद्यात्कांचनसंपूर्णां हेमां सर्वगुणान्वितां । अधिकं तु फलं न्यूनं रुद्रजाप्यात्सकृद् द्विजाः ॥ समोस मा धियो जपेद्रुद्रानन्य
श्चैवं नात्र संशयः । तपस्तप्यति योत्यर्थं सहस्राद्वानि संयमि । न स तत्फलमवाप्नोति तत्सकृद्रुद्रजापिनः । यस्तु तं
कांचनाभासं गोमूत्रं यावकं पिबेत् ॥ न स तत्फलमाप्नोति यत्सकृद्रुद्रजापिनः । गवां कोटिं प्रदानेयः करोति विधि
वद्गुरौ ॥ न स तत्फलमाप्नोति यत्सकृद्रुद्रजापिनः । जपस्तपांसि दानानि तीर्थानि विविधानि च । एतानि
रुद्रजाप्यस्य कलां नार्हन्ति षोडशीं । यत्र यत्र वसेन्सो हि रुद्रजापी द्विजोत्तमः । तत्र तत्र ज्वलन्त्वीह्येदुष्टाः सर्वे
द्रवंति तत । किमन्यैर्वहुभिर्मंत्रैः व्रतैश्च नियमैरपि । यस्तैस्तैर्जपहोमैश्चैर्वा किं प्रयोजनं ॥ रुद्रेभ्यस्तु परं नास्ति जप्यानां
तेजपः । यज्ञो दाने च तीर्थानि तस्मान्नातोधिकं तपः । त्यक्त्वान्यविषयानुष्ठानं सेवार्थे जितेंद्रियः । अयस्त्वहो जपेद्रुद्रा
न्नूनमापि र्भवेन्नवः । समं भावसमायो जपेद्रुद्रान्द्विजः सदा । अनेनैव तु देहेन स रुद्रो जायते ध्रुवं । तस्यं द्रोह्नते मुंदंडी ने
ऋतो वरुणा मरुत् । धनदाद्यास्तु शंकंते ईशानो वरदो भवेत् ॥ ब्रह्माद्यास्तु सुराः सर्वे दैत्याश्चैव विशेषतः । सततं वा
समायांति वीक्षितं रुद्रजापिनं । अनेनैव विधानेन जपन् रुद्रान तंद्रितः । सोधयेत्स कुलं चेदं जगच्चित्रं चराचरं । यो हि

२

2

१८

तथा॥ अनवत्यादिदोषेषु शाकिन्यादिग्रहेषु च। सर्वज्वरविनाशाय रुद्रं पूज्या न संशयः। सर्वेषु ग्रहदोषेषु दुःस्वप्नाद्भूतदर्शने। जपेन्नेतत्सकृद्विप्रः सर्वदोषैः प्रमुच्यते॥ कपोतोलूकसरघाविकारोत्पादने तथा। वल्मीक

सरटकादेश्च स्पर्शने रुद्रपूजनं। भवतीति शेषः॥ यमः॥ कृत्वा पंचालखिल्यांश्च भित्त्वा चैव

बान्धवाकर्षं। हित्वा तु रुद्रान् सकृज्जप्त्वा मुच्यते सर्वपातकैः॥ तथा॥ स्मृतियाररण्यकं जपेद्

गायत्र्याश्च विशेषतः। सर्वपापहरा ह्येता रुद्रैकादशिनी तथा॥ तथा च शातातपः॥ मद्यं पीत्वा गुरुदारांश्च

गत्वा स्तेयं कृत्वा ब्रह्महत्यां च कृत्वा। भस्मच्छन्नो भस्मशय्याशयानो रुद्राध्यायी मुच्यते सर्वपापैरिति॥ ज

पश्चैकादश कृत्वः कार्यः। एकादशगुणं वापि रुद्रानावर्त्य धर्मवित्। महापापैरपि स्पृष्टो मुच्यते ना

त्र संशयः॥ इत्यग्निस्मरणात्॥ रुद्रान् रुद्रमंत्रानध्यीते एवं शीलो रुद्राध्यायी॥ रुद्रध्यानरतो नित्यं रुद्रपू

जनतत्परः। यं यं काममभिध्यायेत् तं तं प्राप्नोत्यसंशयं। स्पृष्ट्वाश्वत्थं जपेद्यस्तु रुद्रैकादशिनीं शुचिः। रोग

ज्वरातिसारादीन् नाशयेत्तु लवणानपीति॥ परशुरामीये॥ यजंत्विति नमो ध्यायं पौरुषं सूक्तमेव च॥ ते विशं

ति महादेवं ददृशुस्तेह पञ्चविंशतिर्यथा। यथोक्तफलं प्रवर्कं बंधनान्मुच्यते स्वयं। रुद्रजापी तथा पापात्सर्वस्मादेव

मुच्यते। मेरुमंदरतुल्यानि पापान्यपि विविधानि च। रुद्रजापी दहेत्पापं कन्याविक्रयजं विना। गायत्री हरते

पापं त्र्यंबकेच्छि मायुष्यं। उभयं रुद्रजाप्येन संततेश्चानुवर्द्धनं। लिंगार्चनं रुद्रजापो व्रतं शिवदिने नत्रयं

॥ वाराणस्यां तु मरणं मुक्तिरेषा चतुर्विधा॥ एकादश्यष्टमी चैव पक्षयोश्च चतुर्दशी। क्षिप्रस्यतिथ

रु =

महाकल्पे ॥ शतानंद उवाच ॥ गणेशान् समाख्याहि यथा देवेन शंभुना ॥ इत्युपक्रम्य नंदिकेश्वर उवाच ॥ शृणु देवि प्र
संगेन विपाकं कर्मणां स्फुटं । यथा धनेन पुरुषो जायते कर्मणा भुवि । स्त्रियश्च पुरुषो व्याघ्र तत्सर्वं कथयामि ते । के
लासशिखरे रम्ये सुखासीनं जगद्गुरुं देवि पप्रच्छ देवेशं कलौ कर्मविपाकजं ॥ पार्वत्युवाच ॥ पुरुषस्यानपत्यत्वं व
दमेव दत्तां वरद र । चतुर्विधा स्त्रियो देवा अप्रसूत मृतप्रजा । स्त्रीःप्रसूः काकवंध्या च गर्भस्राववती तथा । पतीसौभा
ग्यहीना च दुर्भगा ऋतुवर्जिता । केन का दोषेन भगवन् तन्मे कथय सुव्रत ॥ निष्कृतिं च समाख्याहि कृपया पर
मेश्वर ॥ ईश्वर उवाच ॥ विप्ररत्नापहरणात् विप्रैः सह विरोधनात् । देवर्षिपितृपूजासु विमुखो नाम भक्ति
तः । गुरुमातृपितृश्राद्धवंचनानां च नित्यशः । अर्थिभ्यो र्थमदातॄणां तथातीर्थविरोधिनां । अप्रदत्तेन पि
थिभ्योपि मोक्षणं पापचेतसां । स्वभार्यानिंदकानां च लोकानां च विरोधिनां । इत्यादि दोषदुष्टानां पापिनां
गृहमेधिनां । दुःश्वेतिग्रहदोषाणां जायते चानपत्यता । स्त्रियोपि च बहुधैवं स्युः पूर्वकर्मप्रदर्शिताः । वंध्या भव
ति या बाल्ये उद्वेजयति मातरं । गर्भघ्नी या भवेत्स्त्री सा वंध्या भवति सा ध्रुवं । अन्यामनपत्यां च भिक्षुति वंध्य
तां व्रजेत् ॥ मृतप्रजा भवेन्नारी फलं दत्वा हरेत्तु या । फलस्तेन्यं च कुरुते सापि स्यान्मृतवत्सका ॥ पुरुषे
देषणी नारी स्त्री प्रसूतिर्भवेद्ध्रुवं ॥ व्रतदानक्रियाहीना काकवंध्यात्वमाप्नुयात् ॥ काकवंध्या भवेत्साहि गर्भ
पावं करोति या । देवानां च पितॄणां च दानकर्माणि मैथुने । केशान्संमोचये दत्वा न पत्या यदा भवेत् । देवे
पित्र्ये तथा कार्ये हेतु रते वानकर्मणि । पक्षोपांचेक्रमते भूमिं मूर्ध्नि जानाम संपमात् । अनपत्यत्वहेतु

स्त्री गर्भी च भवेत्पुंसां बालान् हिंसन्ति याधिनाः। स्त्रीहत्यां दुर्बुद्धिदायाच भर्तुः सौख्यं न सा लभेत्। देवद्विजगुरुभ्यो
द्वेष्टा न्यपि तं भ्रान्मर्षिता भवेत्। यासां दौर्भाग्यमाप्नोति जनमध्ये प्रिया भवेत्॥ चौर्यात्तु व्यालि चिनुया
त्सा भवेद्दुःखवर्जिता॥ वैधव्यं पुत्रशोकं च दारिद्र्यं चैव दासतां। प्राप्नोति कर्मभिर्यैस्तु तान्निताद्भिवदाम्यहं॥
व्रतोपवासनियमतीर्थसेवाकरी यदि। न्यात्मबुद्धिरता याच खलं चाप्रियवादिनी। स्वकुलाहीनचारा सा
बालवैधव्यमाप्नुयात्॥ ऋतुस्नाता च या नारी भर्तुस्तल्पं न गच्छति। यौवनस्या तु गर्वेण विधवा कामचारि
णी। वंचयित्वा च भर्तारं यामुमांसं परिव्रजेत्। बालवैधव्यमाप्नोति कामार्त्ती बहुपुंश्चलिता। न्यंसयो
स्कंद्विधा भागान् केशान् पश्यति यदि स्त्रिया। वैधव्यं पुत्रशोकं च प्राप्नुयाज्जन्मजन्मनि। गृहोपस्करपात्रा
णि रागौ यस्याः पृथक् पृथक्। दारिद्र्यं प्राप्नुयात्सा वै बहुजन्मनि जन्मनि। मुक्तकेशा तु या नारी कमते
हसते यदि। दासत्वं प्राप्नुयात्सा हि विमुक्ता पुत्रबांधवैः॥ अतस्तु कर्मशांत्यर्थं पतितव्यं प्रयत्नतः॥
पूर्वजन्मकृतस्यास्य दुरितस्यापि निष्कृतिः॥ जायते सततं धर्मस्तु एकमना प्रिये। ज्ञात्वा पापानि मति
मान् गुरूणि च लघूनि च। प्रायश्चित्तं तथा वित्तं प्रकार्यं तेन शुद्धये। षडब्दं चतुरब्दं वा त्र्यब्दं द्व्यब्दमे
व च। गोहिरण्यादि दानं वा कृत्वा कर्म समारभेत्। पश्चात्तद्दोषशांत्यर्थं महारुद्रः प्रकीर्तितः। त
था कलशं रुद्रमन्त्रैः पूजा श्राद्धं हरेश्वरी। हरिवंशस्य श्रवणं विधिवत्परिकीर्तितं। तथा संतानगो
पालविधानुष्ठानमेव च। अनपत्यस्य नाशार्थं कुर्यात्स्त्री पुरुषो पि वा। ब्राह्मणे न तु कर्तव्ये सर्वपापा

त्रियोऽपि हि कुर्वाणः संग्रामे विजयी भवेत् । अंगरस्तु कर्त्तव्यः सर्वरोगापनुत्तये । संग्रहण्यादिरोगैश्च पीडितस्या
पि शर्मदः । कृतो दशरथेनेह तेन पुत्रः सुबुद्धिमान् । रामचंद्रो महावीर्ये बभूव पुरुषोत्तमः । वीरसेनोऽपि कृतवान् पु
राय श्लोकोनल स्तथा । इंद्रराजोऽपि कृतवान् स्वर्गराज्याधिपो भवेत् । रामचंद्रोऽपि कृतवान् द्वौ पुत्रौ च गुणान्वि
तौ । पांडुराजोऽपि कृतवान् पंचपुत्रान् गुणान्वितान् । युधिष्ठिरोऽपि कृतवान् सत्यवादी सदा भवेत् । ब्रह्माऽपि कृतवा
नेषः नारदः समजायत । अतः सर्वैः प्रकर्त्तव्यः सर्वकामफलप्रदः । अल्पायासस्य चाप्यस्य फलमेतावदु
च्यते । वक्तुं नैव हि शक्नोति महारुद्रादिकं फलं ॥ यावज्जीवं जपेद्रुद्रं पौरुषं सूक्तमेव च ॥ प्रविशेच्च महादे
वं मे ग हं हयवेत्त यथा ॥ इति नित्यविधेरत्र स्युः सर्वे व्याधिकारणः ॥ यस्माद्देव महाप्राज्ञः फलमीदृक् प्रद
र्शितं । तस्मात्सर्वप्रयत्नेन रुद्रमाराधयेत्सदा । इति ते कथितं विप्र प्रायश्चित्तं द्विजात्मज मिति ॥ तथा ॥ शृणुष्व
मो महाप्राज्ञ रुद्रभेदान्वदामि ते ॥ रुद्रः पंचविधाः प्रोक्ता देशिकैरुत्तरोत्तरं । सांग आद्यो रूपकाख्यः सशीर्षो रु
द्र उच्यते ॥ एकादशगुणैस्तद्वद्रुद्री संज्ञो द्वितीयकः । एकादशभिरेताभिः तृतीयो लघुरुद्रकः । ल
घ्वेकादशभिः प्रोक्तो महारुद्रश्चतुर्थकः । पंचमस्यान्महारुद्रैरेकादशभिरंतिमः । अतिरुद्रः क्रमाख्या
तः सर्वेभ्यो ह्युत्तमोत्तमः । शिवसंकल्पहृदयं सूक्तं स्यात्पौरुषं शिरः । आशुर्नारायणी हि शिखा तस्यो
त्तरे भिधां आशुः शिशानः कवचं नेत्रं विभ्राड्बृहत्सप्ततिं । शतरुद्रियमस्त्रं स्यात्षडंग क

रु॰ वि॰ प

४

५

रुद्रं हि रु[illegible] स्तु शिवानैमेगं कूर्मचार्य तं महामते ॥ माहृ विधिज्ञा रुद्रस्य षडंगानि वशगाव्रतः ॥ सकामो न
जपेन्नेत्रं रुद्रं यजगुरुं बुधाः ॥ तत्कामदहनं त्यक्त्वा द्विनेत्रं तु जपेदिह ॥ नेत्रहीनः कथं चैषोऽधः कुर्या
त्तु सा महाफलं । निष्कामस्तु जपेन्मन्त्रं त्रिनेत्रं मुनिसत्तम । रुद्राध्यायः स रुद्रः स्यात्प्रथमः सांग शीर्षकः ॥
एकस्यैकादशावृत्त्या रौद्री नाम्नी द्वितीयकः । सांगं माह्यं जपेद्रुद्रं केवलानि न्यांतरे । सांगं सशीर्षकं चात्यं निरंगं शिवकेवलं ।
ताभिरेकादशैकाभिर्लघुरुद्रस्तृतीयकः लघ्वैकादशाभिस्तद्वन्महारुद्रश्चतुर्थकः । एकादशमहारुद्रैस्त्वति
रुद्रः स पंचमः एषु पंचसु रुद्रेषु श्रेष्ठः स्यादुत्तरोत्तर इति ॥ माधव निदाने ॥ दक्षापमानसंक्रुद्ध निश्वास सं
भवः ॥ ज्वरोऽष्टधा पृथग्द्वन्द्व संघातागंतुकः स्मृत इति ॥ रुद्रसंमत्वेन देवदीनात्मकत्वात्पूजार्हत्वमुक्तं ॥ ये

ती = दाहविदेहः ॥ ज्वरस्तु पूजनैर्वापि सहस्रैश्चोपशाम्यतीत्यादि ॥ अथ रुद्रजपाधिकारी निरूपणं ॥ तथा सनत्कुमा
र उवाच ॥ यन्माहात्म्यं तमोकार रुद्राणां रुद्ररूपिणे ॥ देवप्रवृत्ति तथा तेषां जपतां च तथा शृणु ॥ रुद्रां
शो रुद्रमूर्तिर्यो ब्राह्मणो दग्धकिल्बिषः ॥ तस्य ते हृदये नित्यं वसंति नेतरस्य च । अकोपनश्च दधानश्च
ति दान्दमः शिववर्जितः ॥ यश्च ब्रूते सदा सत्यं न वचोऽतिवर्ष्टतः । तानेव स्मरं वै तेषां रुद्रा तस्य तत्फलदाः स
र्वदा । परस्वं परं च कामयेत हरेत्तु यः । तुरोश्चालीकस्तैभिर्वेशीन तस्य फलदा ध्रुवं । यत्कुत्रो हसेत्
ते लोकान् ब्राह्मणांश्च तपस्विनः । शापत्यहं कृतो मूढश्च फलास्य ते ध्रुवं । नेत्यकं विधिमुत्सृज्य

अथास्य पुरश्चरणं। कालिकापुराणे॥ कृच्छ्रमादौ स्वयं चीर्त्वा पराकं च तथा पुनः कृत्वा ध्यायन् महादेवमिदं भूयः स
माचरेत्। स्नात्वा ईशानमभ्यर्च्य उषित्वा सर्वशर्वरीः। जपेद्रुद्रं तथा जप्त्वा तदंते माशयेद्धृतं। अपरे द्युस्संजाते स
माप्यैवं व्रतं पुनः। कृत्वा ध्यात्वा स्करा भिभूतो भूत्वा तद्दिने तान् जपेत् रुद्रान्। भूयश्चान्हि जपेद्रुद्रं संपूज्या
विधिवत्ततः। घृताक्तैर्बिल्वपत्रैश्च रुद्रैर्होमं प्रकल्पयेत्। एवं सम्यक् व्रतेनैव कृते सोऽजायते द्विजः सांद्रुद्रम
हातेजा ततः कामान् स्वसाधयेदिति॥ अथ प्रारंभदिनकृत्यमाह॥ तथा हि आदौ विनायकं पूज्य ग्रहांश्चैव वि
धानतः। कर्मणां सिद्धिमाप्नोति श्रेयश्चाप्नोत्यनुत्तममिति याज्ञवल्क्यवचनात् संकल्पपूर्वकमविघ्नस
माप्त्यर्थं विनायकस्य ग्रहाणां चादौ पूजा। ततः आचारप्रमाणकः प्रधानसंकल्पः। ततो मातृपूर्वकमाभ्यु
देयिकं श्राद्धं॥ अनिष्ट्वा तु पितॄन् श्राद्धेन कुर्यात् कर्म वैदिकं॥ तेभ्योपि मातरः पूर्वं पूजनीयाः प्रयत्नतः॥
इति शातातपोक्तेः॥ न चैवं तावत् श्राद्धांगमात् पूजा॥ कर्मादिषु च सर्वेषु मातरः सगणाधिपाः। पूजनीया
प्रयत्नेन पूजिताः पूजयंति ताः। इति कात्यायनेन साक्षात्कर्मांगेषु च पृथक् संकल्पैः आचारप्रमाणकः। श्रो
ते तु न तथा॥ श्राद्धस्य च प्रकृतकर्मांगतायां प्रमाणं। यज्ञोद्वाहप्रतिष्ठासु मेखलाबंधमोक्षयोः। पुत्रजन्म
वृषोत्सर्गे वृद्धिश्राद्धं समाचरेदिति॥ विष्णुपुराणीयवचनं॥ मातरश्च पविशिष्टे गौर्यादिपद्मेत्यादौ दि॥ आ
दौ विनायकं पूज्य अंते च कुलदेवता। प्रतिमासु च शुभ्रासु लिखित्वा वा पटादिषु॥ अथवाक्षतपुंजेषु नैवेद्यै
श्च पृथग्विधैरिति॥ नैवेद्यैः इति पूजोपचाराणां तेषां उपलक्षणं॥ शुभम्॥ पुरश्चरणे प्रकार

ॐ श्रीगणेशाय नमः ॥ अथ पद्धतिरुच्यते ॥ तत्र यजमानो ज्योतिर्विदुक्त शुभे काले गुरुभार्गवयोर्मौढ्यबाल्यवार्द्ध
क्यरहिते तथा वित्तादिना प्रायश्चित्तं कृत्वा कर्म समारभेत् ॥ तत्र कूष्माण्डगणहोमं च कुर्यात् । ततो यजमानः संपा
दितप्रातःकालीननित्यकर्मक्रिया मध्याह्नस्नानसमये प्रक्षालितपाणिपादः स्वाचांतः सपत्नीकः कर्मस्थान
मागत्य देशकालकीर्तनांतं कृत्वा प्रारिप्सितामुकरुद्रांगस्नानमामाध्यान्हिकस्नानं च एकतंत्रेणाहं करिष्ये
इति संकल्प शक्तौ सत्यां वारुणं तदभावे मंगोदिसस्कस्नानान्यतमस्नानं कृत्वा धौतशुक्लवाससी परिधायोत्तरी
यः संध्यातर्पणदेवतार्चनपंचमहायज्ञान् संपाद्य सुप्रक्षालितपाणिपादंतः कुशोपग्रहः सयपाणिः सपवि
त्रदक्षिणपाणिः स्वाचांतः कर्मस्थाने आशान प्रशस्ते दारुनिर्मिते कुतरकंबलाद्यास्तृते पीठे प्राङ्मुख
उपविश्य स्वदक्षिणतः पत्नीमुपवेश्य । गायत्र्यानैर्ऋत्यां शिखां बध्वा तूष्णीं पवित्री ग्रंथिं जुष्टिकां च ब
ध्वा यथाविधीन् तनयज्ञोपवीतधारणं कृत्वा कर्मांगमाचमनं विधाय प्राणायामत्रयं कुर्यात् ॥ त
तः नैमित्तिकरुद्रानुष्ठाने अमुकनिमित्तं अमुकरुद्रमहं करिष्ये । इति संकल्पः ॥ ॐ अत्र पृथिव्यां जंबू
द्वीपे भारतवर्षे अमुकक्षेत्रे ऽमुकदेशे ॐ अद्य श्रीब्रह्मणो द्वितीये परार्धे श्वेतवाराहकल्पे वैवस्वतमन्वंतरे अ
ष्टाविंशतितमस्य कलियुगस्य प्रथमचरणे अमुकवांतरयुगे अमुकवत्सरे अमुकायने ऽमुकर्तौ अमुक
र्तौ अमुकमासे मुकपक्षे मुकतिथौ अमुकनक्षत्रे मुकवासरे मुकयोगे मुककरणे मुकफलकामो ऽमुक
रुद्रमहं करिष्ये ॥ इति संकल्पं कुर्यात् ॥ रक्तचंदनादिभिरष्टदलकरणं तस्मिन्नष्टदले ॥ ॐ भूर्भुवस्वः

ॐ गणानां त्वा० वसो मम इह तिष्ठ इति स्थापनं ॥ ॐ नमो महागणपतये ऋद्धिसिद्धिसहिताय सवाहनाय सायुधाय सपरिवाराय इमासन
मित्यादिप्रयोगेण गणानां त्वेति मंत्रेण वा षोडशोपचारैः पंचोपचारैर्वा गणपतिपूजनं ॥ हे हेरंब त्वमेह्येहि अंबिकात्र्यंबिकात्मज
सिद्धिबुद्धिपते त्र्यक्ष लक्षलाभपितः पितः ॥ नागास्य नागहार त्वं गणराज चतुर्भुज । भूषितः स्वायुधैर्दिव्यैः पाशांकुशपरश्वधैः ।
आवाहयामि पूजार्थं रक्षार्थं च मम गृहे । इहागत्य गृहाण त्वं पूजां क्रतुं च रक्ष मे ॥ आवाह्यैवं गणेशं तु पूजाद्रव्यैः प्रपूजयेत् ॥
ततो नारिकेलाद्यन्यतमं फलं वा पात्रे निधाय गंधादिकं च निधाय ॥ रक्त रक्त गणाध्यक्ष रक्त त्रैलोक्यरक्षक ॥ भक्तानामभ
यंकर्ता त्राता भव भवार्णवात् ॥ द्वैमातुर कृपासिंधो षाण्मातुराग्रज प्रभो ॥ वरद त्वं वरं देहि वांछितं वांछितार्थद ॥
अनेन फलदानेन फलदोस्तु सदा मम ॥ इति सार्घ्यना ॥ अथ प्रार्थना ॥ विघ्नेश्वराय वरदाय सुरप्रियाय लंबोदराय सक
लाय जगद्धिताय । नागाननाय श्रुतियज्ञविभूषिताय गौरीसुताय गणनाथ नमो नमस्ते ॥ भक्तार्तिनाशनपराय
गणेश्वराय सर्वेश्वराय शुभदाय सुरेश्वराय ॥ विद्याधराय विकटाय च वामनाय भक्तप्रसन्नवरदाय नमो नम
स्ते ॥ नमस्ते ब्रह्मरूपाय विष्णुरूपाय ते नमः ॥ नमस्ते रुद्ररूपाय करिरूपाय ते नमः ॥ इति प्रार्थना ॥ अथ
नम० ॥ इति ॥ त्वां विघ्नशत्रुदलनेति च सुंदरेति भक्तप्रियेति सुखदेति फलप्रदेति । विद्याप्रदेत्यघहरेति
च ये स्तुवंति तेभ्यो गणेश वरदो भव नित्यमेव । लंबोदर नमस्तुभ्यं सततं मोदकप्रिय । अविघ्नं कुरु मे देव स
र्वकार्येषु सर्वदा ॥ इति समापनं ॥ अथ मातृकापूजनं ॥ नाभ्यिष्ट्वा तु पितॄन् श्राद्धेन कुर्यात्कर्म वैदिकं ॥
तेभ्योऽपि मातरः पूर्वं पूजनीयाः प्रयत्नतः इति शातातपोक्तेः । कर्मादिषु च सर्वेषु मातरः सगणाधिपाः

भित्तौ तौ पटे वा लिखित प्रतिमासु तत्पुंजेषु वा गणपति सहित गौर्यादि चतुर्दश मातॄः प्रत्येकं पूजयेत् ॥ तासाम् ॥ गौरी पद्मा श
ची मेधा सावित्री विजया जया । देवसेना स्वधा स्वाहा मातरो लोकमातरः । धृतिः पुष्टि स्तथा तुष्टि रात्मनः कुलदेवता ॥ ग
णेशेनाधिका ह्येता वृद्धौ पूज्याः श्चतुर्दश ॥ पूजा प्रकारस्तु ॥ पूजोपकरणान्युपकल्प्य प्राङ्मुखोपविश्य कुशजल
यवान्यादाय अद्येत्यादि अमुककर्तृ प्रागंगतया गणपति सहित गौर्यादि चतुर्दश मातृकापूजनमहं करिष्ये ॥ इति
संकल्प्य ॥ अक्षतैः । ॐ भूर्भुवः स्वः गणपते इहागच्छ इह तिष्ठ । ॐ भूर्भुवः स्वः गौरि इहागच्छ इह तिष्ठ । एवं
पद्मे । शचि । मेधे । सावित्रि । विजये । जये । देवसेने । स्वधे स्वाहे । धृते । तुष्टे । पुष्टे । आत्मकुलदेवते । इति
ष्य= प्रत्येक मावाह्य ॥ ततो मनोजूतिरिति प्रतिष्ठाप्य ॥ ॐ गणपतये नमः इति प्रणवादि नमोन्त चतुर्थ्यंत स्वस्व
नाम मंत्रेण पंचोपचारैः पूजयेत् ॥ तत्र प्रयोगः ॥ ॐ गणाधिपाय नमः एष पाद्योर्घः । इदमनुलेपनं ।
इमानि पुष्पाणि । अयं धूपः । अयं दीपः । इदं नैवेद्यं । इदं तांबूलं ॥ इयं दक्षिणा वासः ॥ इति गणेश पूजनं ॥
एवमेव तत्तन्नामभिः एभिरेव मंत्रैः गौर्यादीनां पूजनं ॥ ॐ गौर्यै नमः । ॐ पद्मायै नमः । ॐ शच्यै नमः ।
ॐ मेधायै नमः । ॐ सावित्र्यै नमः । ॐ विजयायै नमः । ॐ जयायै नमः । ॐ देवसेनायै० । ॐ स्वधायै० ॐ स्वा
हायै० धृत्यै० तुष्ट्यै० पुष्ट्यै० आत्मकुलदेवतायै नमः ॥ इति प्रयंमुख्यः पक्षः ॥ मातॄणां गणदेव
तानयत्तेतु गणाधिपति गौरी पद्मा शचीमेधा सावित्री विजया जया । देवसेना स्वधा स्वाहा धृति पुष्टि आ
त्मकुलदेवताः इहागच्छत ॥ इह तिष्ठतेति आवाह्य स्थापयित्वा प्रतिष्ठाप्य ॥ ॐ गणेशगौर्यादिभ्यो
नम इति पूर्ववदुपचारैः पूजयेत् ॥ ततो मुक रुद्रक्षितिं सप्तवारं पंचवारं वा वसोर्द्धारां करिष्ये । इति सं

कल्प्य ॥ कुड्ये लग्नां वसोर्द्धारां पंच धारा घृतेन तु ॥
कारयेत् सप्त धारा वा नातिनीचा नचोच्छ्रिताः ॥

छंदोगपरिशिष्टे ॥ गुडे दधि मधु घृतं गृहीत्वा पंच सप्त वा धारा नातिनीचा न चोच्छ्रिताः कुड्यादिषु वसोः पवित्र
मसीति घृतधारा उत्सृज्याः कार्याः ॥ ततो वसोर्धारा देवताभ्यो नम इति पंचोपचारैः पूजां कुर्यात् ॥ ततो आयु
ष्यमन्त्रजपः ॥ आयुष्यं वर्चस्यमिति त्र्यृचस्य दक्ष ऋषिः उष्णिक् पंक्ति त्रिष्टुप् छंदांसि । हिरण्यं देवता जपे
पे विनियोगः ॥ आयुष्यं वर्चस्यं० इमं ॥ न तद्रक्षा कृषि दीर्घमायुः ॥२ यदाबध्नन् दाक्षा० यथासं ॥३ इत्यायुष्य
मंत्रजपः ॥ इति मातृकापूजनं ॥ अथ नांदीश्राद्धं ॥ तच्च सपिंडकं अपिंडकं वा ॥ यज्ञोद्वाहप्रतिष्ठासु मेखला
बंधमोक्षयोः । पुत्रजन्मवृषोत्सर्गे वृद्धिश्राद्धं समाचरेत् इति विष्णुपुराणे ॥ इदमभ्युदयिकं कात्यायनमता
नुसारिणां तु वैश्वदेववत्यं ॥ ये तु केवलमाग्नहादेव नमाभ्युदयिके । भिक्षुं इति तेषांनुपद्ध्य इत्युपलक्षणं ॥
मातृश्राद्धं तु सर्वस्यात्पितृणां तदनंतरं । ततो मातामहानां वै च वृद्धौ श्राद्धमयं स्मृतमिति शातातपो
क्तेः ॥ इदं च यथाकुलदेशाचारेण सपिंडकमपिंडकं वा ॥ सत्क्रियादेशकालौ च शौचं ब्राह्मणसं
पदं । पंचैतान्विस्तरो हंति तस्मान्नेहेत विस्तरं ॥ इत्यादिवाक्यदर्शनात्पूर्वाह्णादिषु मुहूर्तकेति
यमनल्पकर्मकालादिभयादामान्नफलमूलादिभिर्यथालाभसंक्षिप्तमपि श्राद्धमाचार्यैर्मन्यं
ते ॥ तच्च पिंडादिवर्जितं कर्तव्यं ॥ यथा भविष्यत्पुराणे ॥ पिंडनिर्वपनं कुर्यान्न वा कुर्यात् द्विजसत्तमः ॥
वृद्धिश्राद्धे कुलाचारे देशकालाद्यपेक्ष्य हि ॥ अत्र चाग्नौकरणनामनिषेधः ॥ तथा हि ॥ अग्नौकरण
मर्घ्यं च आवाहनावनेजनं ॥ पिंडश्राद्धे न कुर्वीत अपिंडे हीने निवर्तते ॥ तथा ॥ पिंडनिर्वापरहितं यत्र श्रा

अथ प्रयोगः ॥ कर्त्ता पूर्वाह्ने सुस्नातः सुप्रक्षालितकरचरणः स्वाचांतः सुस्नातानाचांतानूनष्टौ ब्राह्मणानाहूय
वहिरुपकल्पिते गोमयोपलिप्ये मंडले स्वागतं वः सुस्वागतमिति प्रत्येकं प्रश्नोत्तरपूर्वकं प्रागग्रकुशोत्तरे
ष्वासनेषु प्राङ्मुखान् दक्षिणोपक्रमान् ॥ उदगपवर्गान् उपवेश्य स्वयमुदङ्मुख उपविश्य आद्ययोर्द्विप्र
योर्जानुनी स्पृशन् देशकालौ संकीर्त्य अमुकरुद्रनिमित्ताभ्युदयिक श्राद्धाख्ये कर्मणि नांदीमुखास्मन्मा
त्रादित्रय नांदीमुखास्मत्पित्रादित्रयाणां नांदीमुखास्मन्मातामहादित्रय संबंधी सत्यवसु संज्ञिक विश्वेदे
वकृत्ये भवतौ मया निमंत्रितौ इति तांबूलादिदानपूर्वकं निमंत्रयेत् ॥ निमंत्रितौ स्व इति प्रतिवचनं ॥ पुन
स्तांबूलादिकमादाय तदुत्तरतयोर्द्विप्रयोर्जानुनी स्पृशन् ॥ अमुकगोत्राणां नांदीमुखास्मन्मातृ पिता
मही प्रपितामही अमुकामुक देवीनां अद्य कर्तव्य अमुकरुद्राभ्युदयिकश्राद्धे भवंमयो निमंत्रितौ इति
तांबूलादिदानपूर्वकं निमंत्रयेत् ॥ निमंत्रितौ स्व इति प्रतिवचनं ॥ पुनस्तांबूलादिकमादाय अद्येह अमु
कगोत्राणां नांदीमुखास्मन्मातामह प्रमातामह वृद्धप्रमातामहानां अमुकामुकशर्मणां अद्य कर्तव्य
अमुकरुद्रनिमित्ताभ्युदयिक श्राद्धे भवंतौ मया निमंत्रितौ इति तांबूलादिदानपूर्वकं निमंत्रयेत्
॥ निमंत्रितौ स्व इति प्रतिवचनं ॥ ततो अक्रोधनैः शौचपरैः भवितव्यं । मया च श्राद्धकोऽस्मिन्निति सर्वान्
समाश्वासयेत् ॥ ततो देव द्विजपूर्वकं चरणक्षालनं विधाय अद्येह नांदीमुखास्मन्मातादि
त्रय संबंधी सत्यवसु संज्ञिका विश्वेदेवा एतत्पादार्घ्यं वो नमः इति गंधादतादियुक्तं पादार्घ्यं

इति मातृवर्गब्राह्मणायो दीत्वा ॥ अद्येहामुकगोत्राः नांदीमुखाः सपित्न् पितामहप्रपितामहाः अमुकामुक
शर्मणः तत्त्वादार्घ्यं वो नम इति पितादिवर्गब्राह्मणस्य चरणयो दत्वा ॥ अद्येहामुकगोत्राः नांदीमुखाः
सपत्नी मातामह प्रमातामह वृद्धप्रमातामहाः अमुकामुकशर्मणः ए तत्त्वादार्घ्यं वो नम इति मातामहवर्ग
ब्राह्मणचरणयो रर्घ्यं दद्यात् ॥ ततो ब्राह्मणानाचम्य स्वयमप्याचम्य ॥ श्राद्धदेशं प्रथमकल्पितेष्वा
सनेषु इदमासनम् आस्यतामिति प्रयोगेण देववर्गब्राह्मणान्देव पूर्वं द्विजानुपवेश्य स्वयमुदङ्मु
ख उपविश्य कर्मसौकर्यार्थं पात्रं जलेनापूरयेत् । दूर्वा दधि यव कुशान् तत्र निक्षिप्य प्राणायामत्रयं
पूर्वकं विष्णुस्मरणं कृत्वा कर्मपात्रं जलेनोपकरणानि प्रोक्ष्य दूर्वाकुशयवजलानि दक्षिणकरे गृही
य पूर्ववद्देशकालौ कीर्तनांते अमुकगोत्राणां नांदीमुखानां सन्मातृ पितामही प्रपितामहीनां अमुका
मुकदेवीनां अमुकगोत्राणां नांदीमुखानां सपित्न् पितामह प्रपितामहानां अमुकशर्मणां अमुक
गोत्राणां नांदीमुखानां सपत्नी मातामह प्रमातामह वृद्धप्रमातामहानां अमुकामुकशर्मणां अमुक रुद्र
निमित्तं सत्यवसुसंज्ञक विश्वेदेवश्राद्धपूर्वकं सांकल्पेन विधिना नांदीश्राद्धमहं करिष्ये इति संकल्पं
कुर्यादिति प्रतिवचनं ॥ ततः सदानवच्याहृतिकगायत्र्या त्रिर्जपः विष्णुस्मरणं । मात्रादित्रयं पिता
दित्रयं मातामहादित्रयं श्राद्धसर्वद्धिनः सत्यवसुसंज्ञिका विश्वेदेवा इदमासनं वो नम इति प्रा
गग्र ऋजुकुशद्वय सयव जलं दक्षिणात्त आसनोपरि दत्वा अमुकगोत्राः नांदीमुखाः सन्मातृपि

त्पितामहप्रपितामहाः अमुकामुकशर्माणः इदमासनं वो नम इति पित्रादिवर्गब्राह्मणहस्तयासनोपरि दत्त्वा पि
त्रादिपदस्थाने मातामहादिपदप्रक्षेपेण तृतीयब्राह्मणहस्तयासनोपरी सनं दद्यात् ॥ ततः प्रत्यासन्ने दीपस्थानं ॥
ततो ब्राह्मणहस्ते प्रथमब्राह्मणहस्तं दत्त्वा तत्र जलपूर्वकं गंधादि दत्त्वा कुशजलयवान्यादाय पित्रादित्रयपि
त्रादित्रयमातामहादित्रयसंबंधितेभ्यो सत्यवसुसंज्ञका विश्वेदेवा इमानि गंधपुष्पधूपदीपवासोलंकार
णतांबूलानि वो नमः ॥ अमुकगोत्राः नांदीमुख्यो मन्मातृपितामहीप्रपितामह्यः अमुकामुदेव्यः इमानि
गंधतांबूलानि वो नम ॥ अमुकगोत्राः नांदीमुखाः मत्पितृपितामहप्रपितामहाः अमुकामुकशर्माणः इमानि गं
धतांबूलानि वो नमः ॥ अमुकगोत्रा नांदीमुखाः अस्मन्मातामहप्रमातामहवृद्धप्रमातामहाः अमुकामुकश
र्माणः इमानि गंधपुष्पतांबूलानि वो नमः ॥ अन्नपरिवेषणं ॥ पात्रमालभ्य पृथिवी ते० जुहोमि स्वाहे
ति जपित्वांगुष्ठमनेवः समस्य इदमन्नमिमा आपः इमाज्यं हविः इत्यकः कामा नान्दि त्रयमातामहा
दित्रयसंबंधिनः । एवं क्रमेणः पितृणां पूजादिकं । सत्यवसुसंज्ञकविश्वेदेवा इदमन्नं घृतान्नुपस्कर
सहितं परिवेषं परिवेष्यमाणं चाक्षिजयी तृप्तिपर्यंतं अमृतरूपं वो नम इत्युत्सृजेत् ॥ एवमेव मात्रादि
पात्र इयमालभ्य अमुकगोत्राः नांदीमुख्यो मन्मातृपितामहीप्रपितामह्योऽमुकदेव्यः इदमन्नं घृ
तान्नुपस्करसहितं अमृतरूपं वो नमः ॥ एवमेव पित्रादिपात्रयोः मातामहादिपात्रयोरपि संकल्पं
कुर्यात् ॥ ततो मन्त्रमुपविश्य मंगलजपः ॥ तृप्तान् ज्ञात्वा अन्नं विकीर्य सकृत्सकृत् दद्यात् दत्त्वा पूर्ववज्जा

= श्रा द्ध प ॰ ८

मधुमती र्मधुमतीभिश्च सुसंपन्नमिति ते रुद्रे शेषमन्नं किं क्रियता मिति स्व इष्टैः सह भुज्यता मितितेरुक्ते ब्राह्मणानामाचमेत् ॥ सुप्रोक्षितमस्तु ॥ शिवा आपः संतु ॥ सौमनस्यमस्तु ॥ अक्षतं चारिष्टं चास्तु ॥ नांदीमुख्यो मातरः प्रीयंतां ॥ नांदीमुख्यः पितामह्यः प्रीयंतां । नांदीमुख्यः प्रपितामह्यः प्रीयंतां । नांदीमुखाः पितरः प्रीयंतां । नांदीमुखाः पितामहाः प्रीयंतां । नांदीमुखाः प्रपितामहाः प्रीयंतां । नांदीमुखाः मातामहाः प्रीयंतां ॥ नांदीमुखाः प्रमातामहाः प्रीयंतां । इति नांदीमुखाः वृद्धप्रमातामहाः प्रीयंतां । इति क्षीर यव जला नि दद्यात् ॥ ततः प्रांजलिः आशीषाः प्रार्थयेत् ॥ अघोराः पितरः संतु ॥ संत्विति ब्राह्मणाः ॥ गोत्रं नो वर्द्धतामिति यजमानः ॥ वर्द्धतामिति तैः ॥ दातारो नोभिवर्द्धतां ॥ अभिवर्द्धतामिति तैः । वेदाः संततिरेव च ॥ अभिवर्द्धतां । श्रद्धा च नो माव्यगमात् ॥ मागात् ॥ बहुधनं च नोस्तु । अस्त्विति वचनं । ततो मात्रादित्रय पित्रादित्रय मातामहादित्रय श्राद्ध संबंधी वैश्वदेविक श्राद्ध प्राप्त्यर्थं अमुकशर्मभ्यां भवद्भ्यां इदं द्राक्षा मलका र्द्र मूलकादि रूपा विष्णु देवता दक्षिणा मया दत्ता इति देव ब्राह्मणेभ्यां दक्षिणां दत्वा अमुकगोत्राणां नांदीमुखानां मातृ पितामही प्रपितामहीनां अमुकदेवीनां कृतैतद्दाभ्युदयिक श्राद्ध प्रतिष्ठार्थं अमुकामुकगोत्राणां नांदीमुखास्म त्पितृ पितामह प्रपितो बृवंतु इति सर्वान् प्रत्युक्ता स्वस्तीति तै रुक्ते ब्राह्मणान् प्र…

अथपुण्याहवाचनं ॥ अमुककर्मणि मित्रपुण्याहवाचनं करिष्ये ॥ इति संकल्प महीद्यौरिति भूमिं स्पृष्ट्वा ओषधयः समित्तिय
वान् क्षिप्त्वा आजिघ्रकलशं महीति कलशं स्थापयेत् ॥ वरुणस्योत्तम्भनमिति जलपूरयित्वा त्वां गंधर्वा इति गंधं
क्षिप्त्वा ॥ या ओषधीरिति सर्वौषधीः ॥ ओषधयः समित्तियवान् ॥ कांडात्कांडादिति दूर्वाः ॥ अश्वत्थेव इति पंच
पल्लवान् ॥ स्योनापृथिवीति पंचसप्तमृदं ॥ याः फलिनीति फलं ॥ परिवाजपतिः पंचरत्नानि ॥ हिरण्य
गर्भः हिरण्यं ॥ युवासुवासा इति वस्त्रसूत्रेण वेष्टयेत् ॥ पूर्णादर्वीति धान्यपूर्णमुपरि पात्रं न्यसेत् ॥ तत्त्वायामि
ति वरुणमावाह्य पूजयेत् ॥ तत्त्वायामीति शुनःशेप ऋषिः त्रिष्टुप् छंदः वरुणो देवता वरुणावाहने विनियो
गः ॥ तत्त्वायामीति अमोघीः ॥ ततः गंगाद्यावाहनं ॥ सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः ॥ आयांतु य
जमानस्य दुरितक्षयकारकाः ॥ ततः कलशाभिमंत्रणं ॥ कलशस्य मुखे विष्णुः कंठे रुद्रः समाश्रिताः ।
। मूले तस्य स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः । कुक्षौ तु सागराः सप्त सप्तद्वीपा वसुंधरा । ऋग्वेदो
थ यजुर्वेदः सामवेदो ह्यथर्वणः । अंगैश्च सहिताः सर्वे कलशं तु समाश्रिताः ॥ ततः कलशप्रार्थना ॥
देवदानवसंवादे मथ्यमाने महोदधौ ॥ उत्पन्नोसि तदा कुंभ विधृतो विष्णुना स्वयं ॥ त्वत्तोये सर्वती
र्थानि देवाः सर्वे त्वयि स्थिताः । त्वयि तिष्ठंति भूतानि त्वयि प्राणाः प्रतिष्ठिताः ॥ शिवः स्वयं त्वमे

१०
18

आदित्या वसवो रुद्रा विश्वेदेवाः सपैतृकाः ॥ त्वयि तिष्ठन्ति सर्वे पि यतः कामफलप्रदाः ॥ त्वत्प्रसादादिमं यज्ञं क
र्तुं ईहे जलोद्भव ॥ सान्निध्यं कुरु मे देवेश प्रसन्नो भव सर्वदा ॥ ततः अवनिकृतजानु इत्यादिना वरुणं चन्दन
पुष्पैरिष्ट्वा तत्कार्यमिति हेमाद्रिप्रभृतयः ॥ तत्तु बहुत्वादिह नोच्यते ॥ रूपनारायणस्तु यजमानः प्राङ्मुखो
स्वीनधिकान् ब्राह्मणांस्तु उदङ्मुखानुपवेश्य चंदनवस्त्रतांबूलादिभिः परितोष्य ॐ पुण्याहं भवंतो ब्रुवंत्विति ॥
त्रिस्तान् श्रावयेत् ॥ ॐ पुण्याहमिति त्रिस्ते ब्रूयुः ॥ ॐ स्वस्ति भवंतो ब्रुवंत्विति त्रिस्तान् श्रावयेत् ॥ ॐ स्व
ति= स्तीति त्रिर्ब्रूयुः ॥ ऋद्धिं भवंतो ब्रुवंत्विति त्रिस्तान् श्रावयेत् ॥ ॐ ऋध्यतामिति त्रिर्ब्रूयात् ॥ इदं च ब्रा
ह्मणस्यैव सोंकारत्वं क्षत्रियादि यजमानपक्षे तु निरोंकारं भवति । ततः कुशाग्रैः सपल्लवैः विप्रा अभि
षिंचेयुः । ततः सुवासिनीभिर्नीराजनं कुर्यात् ॥ इति पुण्याहवाचनं ॥ अथ आचार्यादीनां वरणं ॥ तत्र
अमुकरुद्रं गामाचार्य[illegible] ऋत्विजावरणमहं करिष्ये ॥ इति संकल्प्य तत्र यजमानो श्रीपर्णीयासने
न प्राङ्मुखोपविश्य यथोक्तलक्षणं ॥ आचार्यं उदङ्मुखं उपवेश्य एकऋत्विग्द्वयः ॥ द्विगुणवस्त्रमुद्रि
काकुंडलादिभिरभ्यर्च्य अमुकप्रवरान्वितामुकगोत्रोत्पन्नं अमुकवेदान्तर्गतशाखाध्या
यिनं अमुकनामानं ॥ अमुकप्रवरान्वितामुकगोत्रोत्पन्नोऽहं अमुकरुद्राख्यकर्मणि आचा
र्यत्वेन त्वां वृणे ॥ वृतोऽस्मीति स ब्रूयात् ॥

श्रिव.
१०

आचार्यस्तु यथा स्वर्गे शक्रादीनां बृहस्पतिः ॥ तथा त्वं मम यज्ञेऽस्मिन्नाचार्यो भव सुव्रत ॥१॥ इति प्रार्थयेत् ॥ पुनरन्यं ब्राह्मणं त्वयो
ग्यं ब्राह्मणमुदङ्मुखमुपवेश्य ॥ गंधपुष्पवस्त्रादिभिरभ्यर्च्य ॥ अमुकगोत्रोत्पन्नं अमुकवेदांतर्गतममुकशाखाध्या
यिनं अमुकनामानं ॥ अमुकप्रवरान्वितामुकगोत्रोत्पन्नोऽमुकवेदांतर्गतोऽहं अमुकरुद्राख्यकर्मणि कृताकृतावे
क्षणार्थं ब्राह्मणत्वां वृणे । इति दक्षिणहस्तं गृहीत्वा वृणुयात् ॥ वृतोस्मीति प्रतिवचनं ॥ यथा चतुर्मुखो ब्रह्मा सर्व
वेदविशारदः । तथा त्वं मम यज्ञेऽस्मिन् ब्रह्मा भव द्विजोत्तम ॥२॥ इति प्रार्थयेत् ॥ पुनस्तथैवान्यं ब्राह्मणमुपवेश्य
गणपतित्वेन त्वामहं वृणे ॥ वृतोस्मीति प्र० ॥ प्रार्थना ॥ वांछितार्थफलावाप्त्यै पूजितोसि सुरासुरैः । निर्विघ्नकृत्यसं
सिद्ध्यै त्वामहं गणपं वृणे ॥ पुनरन्यं तथैव सदस्यत्वेन वृणे ॥ पुनरन्यं ब्राह्मणमुदङ्मुखमुपवेश्य ॥ गंधपुष्पादि
भिः संपूज्य अमुकऋत्विक्त्वेन त्वामहं वृणे ॥ प्रतिवचनं तथैव ॥ अनेन प्रकारेण एकादशऋत्विजां वरणं
कार्यं ततः प्रार्थना ॥ ऋत्विजश्च यथा पूर्वं शक्रादीनां मखेऽभवन् । यूयं तथा मे भवितुं ऋत्विजो हि यथासत्तमाः ॥१॥
अस्य यागस्य निष्पत्तौ भवंतोऽभ्यर्थिता मया ॥ सुप्रसन्नाः प्रकुर्वंतु शांतिके विधिपूर्वकं ॥२॥ तत्र रूपे एकः एव रु
द्रीलघुरुद्रमहारुद्रे चैकः एकादश वा ॥ अतिरुद्रे एकादश एकविंशत्युत्तरशतं वेति ऋत्विक्संख्या । प्रति
निधिपक्षे त्वनियम इति सांप्रदायिकाः ॥ तथैव नवग्रहजापकानां वरणं । जपहोमादिकं तु स्वयमेव कुर्यात् ॥
स्वस्याशक्तौ स्वप्रतिनिधित्वेन जपाद्यर्थं ब्राह्मणं वृणुयात् ॥ पुत्रकामस्तु ऋत्विजो वृत्वा प्रत्येकं प्रार्थयेत् ॥
भगवन्सर्वधर्मज्ञ सर्वधर्मभृतांवर । वितते मम यज्ञेऽस्मिन् ऋत्विक्त्वमम मे हुजैतेति ॥ सदस्यवरणं रुद्रजपा
र्थं वरणपूर्वकं कर्तव्यं ॥ एवं ऋग्वेदपारायणार्थं ब्राह्मणमुपवेश्य प्रार्थनापूर्वकं पूर्वोक्तप्रकारेण ऋ

११

१५

ऋग्वेदः वह्वृचशाखो गायत्री सोमदेवतः । अग्निगोत्रस्तु विप्रेंद्र ऋत्विक् त्वं मे मखे भवेति वृणुयात् ॥ एवं यजुर्वेदिनो द्वौ
यजुर्वेद पारायणं कर्तुं ऋत्विक्त्वेन त्वामहं वृणे ॥ कातराहोय यजुर्वेदस्त्रिष्टुभो विष्णुदैवतः ॥ काश्यपस्तु विप्रेंद्र
। ऋत्विक्त्वं मे मखे भवेति प्रत्येकं वृणुयात् ॥ प्रतिवचनं तथैव ॥ एवं सामवेदिनो सामवेद पारायणं कर्तुं ऋत्वि
क्त्वेन त्वामहं वृणे ॥ सामवेदस्तु छिन्नातो जगतः शक्रदैवतः ॥ भारद्वाजस्तु विप्रेंद्र ऋत्विक्त्वं मे मखे
भवेति प्र० । एवमथर्ववेदिनो द्वौ अथर्ववेद पारायणं कर्तुं ऋत्विक्त्वेन० वृहन्नेत्रोऽथर्ववेदोनुष्टुभो रुद्र
देवतः ॥ वैशंपायन विप्रेंद्र ऋत्वि० प्रत्येकं० । प्रतिवचनं तथैव ॥ ततो वरणानंतरं वरणक्रमेणैव आचार्या
दीनां स्वशास्त्रोक्तमार्गेण मधुपर्कपूजा कार्या ॥ आचार्यमेव वा मधुपर्केणार्चयेत् ॥ भाजनं भाजनाधारं
छत्रोपानत्कमंडलुं ॥ आसनं वाससी मुद्रा कर्णभूषोपवीतकं ॥ एतद्दशविधं देयं वरणे द्विजये ॥
पदाभावे त्रयं देयं पात्रवस्त्रांगुलीयकं ॥ अथ मधुपर्कपूजनं ॥ पूर्वोक्त एवं गुण विशेषण विशिष्टायां
पुण्यतिथौ अस्मिन्महारुद्राख्ये कर्मणि आचार्य ब्रह्म ऋत्विजो मधुपर्केणार्चयिष्ये ॥ इति संकल्प्य
पूजयेत् ॥ कर्ता आचार्यं प्रति वदति ॥ साधु भवानास्तामर्चयिष्यामो भवंतं ॥ ॐ अर्चय इत्याचार्यः ॥
ततः विष्टरं गृहीत्वा विष्टरो विष्टरो विष्टरः इति प्रतिगृह्यतां प्रतिगृह्णामि इति वचनेन विष्ट
रं हस्ते गृहीत्वा ॐ वर्ष्मोस्मि समानानामुद्यतामिव सूर्यः । इमं तमभितिष्ठामि यो मा कश्चाभिदा
सति इत्यनेन मंत्रेण उपविशति ॥ ततः पाद्यार्थमुदकं हस्ते गृहीत्वा पाद्यमुदकमिति त्रिः ॥
प्रतिगृह्णामीति गृहीत्वा ॥ विराजो दोहोसि विराजो दोहमशीय मयि पाद्यायै विराजो दोह

ततः पूर्ववद्द्वितीयो विष्टरः पादयोरधः दद्यात् ॥ अर्घ्यो० अ० त्रिः प्रतिगृह्य ० प्र० आपस्थ युष्माभिः सर्वान्कामा
न्सवाप्नवानि अनेन पात्रं गृहीत्वा समुद्रं वः प्रहिणोमि स्वां योनिमभिगच्छत ॥ अरिष्टास्माकं वीरा मा परासे
चि तमत्पयः । अनेनार्घदानं ॥ आचमनीयमुदकमा० त्रिः प्रतिगृह्य० ॥ आमागन्यशसा संसृज वर्चसा ॥
तं मा कुरु प्रियं प्रजानामधिपतिं पशूनामरिष्टं तनूनामित्यनेनाचमनं ॥ मधुपर्कमा० त्रिः प्र० प्र० ॐ मित्र
स्य त्वा० ॥ अवेक्ष्य ॐ देवस्य त्वा । इत्यनेन गृहीत्वा नमः । श्यावाश्यायान्नशने यत्त आविद्धं तत्ते निष्कृन्तामी
त्यनामिकया त्रिरवनेज्य ॥ यन्मधुनो मधव्यं परमं रूपमन्नाद्यं तेनाहं मधुनो मधव्येन परमेण
रूपेणान्नाद्येन परमो मधव्योऽन्नादोऽसानि ॥ अनेन मधुवाता ऋता० । इति प्राशनं ॥ आचमनं ॥ वाङ्म
आस्येऽस्तु । नसोर्मे प्राणोऽस्तु । अक्ष्णोर्मे च० । कर्णयोर्मे श्रोत्रं० । बाह्वोर्मे बलं० । ऊर्वोर्मे ओजोऽस्तु ॥
अरिष्टानि मेऽङ्गानि तनूस्तन्वा मे सह सन्तु । ततः वस्त्रं ॥ ॐ परिधास्यै यशो धास्यै दीर्घायुत्वाय
जरदष्टिरस्मि । शतं च जीवामि शरदः पुरूची रायस्पोषमभिसंव्ययिष्ये । स्माती चमनं ॥
ततः यज्ञोपवीतं परमं ॥ आचमनं ॥ ॐ यशसा मा द्यावापृथिवी यशसेन्द्राबृहस्पती यशो भग
श्च मा विदद्यशो मा प्रतिपद्यतामित्यनेनोत्तरीयं ॥ द्विराचमनं ॥ गन्धादेतत्दानं ॥ ॐ सु
चक्षा अहमक्षिभ्यां सुवर्चा मुखेन सुश्रुत्कर्णाभ्यां भूयासं ॥ इति मन्त्रजापः ॥ ॐ या आ
हरज्जमदग्निः श्रद्धायै कामायेन्द्रियाय । ता अहं प्रतिगृह्णे यशसा च भगेन च । अने

२२

12.

ॐ यद्यशोप्सरसामिंद्रश्चकार विपुलं पृथु । तेन संग्रथिताः सुमनस आवबध्नामि यशो मयि । पुष्पबंधने ॥ अ-
लंकरणमसि भूयो लंकरणं भूयात् । इत्यनेनालंकरणधारणं ॥ इति मधुपर्कपूजनं ॥ अथ ब्राह्मणप्रा-
र्थना ॥ ब्राह्मणाः संतु मे श्लाघ्याः पापाशांतु समाहिताः । देवानां चैव दातारः पातारः सर्वदेहिनां ॥ मैज-
पयज्ञैस्तथा होमैर्दानैश्च विविधैः पुनः । देवानां च पितॄणां च तृप्त्यर्थं याचकाः कृताः । येषां देहे स्थि-
ता वेदाः पावयंति जगत्त्रयं । रक्षंतु सततं मां जपयज्ञेष्ववस्थिताः ॥ ब्राह्मणा जंगमं तीर्थं त्रिषु लोके-
षु विश्रुतं । येषां वाक्योदकेनैव शुध्यंति मलिनो जनाः । पावनाः सर्ववर्णानां ब्राह्मणा ब्रह्मरूपि-
णः । सर्वकर्मरता नित्यं वेदशास्त्रार्थकोविदाः । श्रोत्रियाः याः सत्यवाचश्च देवध्यानरताः सदा ॥
यद्वाक्यामृतसंसिक्ता ऋद्धिं यांति नरद्रुमाः । अंगीकुर्वंतु कर्मैतत्कल्पद्रुमसत्तमा द्विजाः ॥ य-
थोक्तनियमैर्युक्ता मंत्रार्थस्थिरबुद्धयः । यत्कृपालोचनात्सर्वा ऋद्धयो वृद्धिमाप्नुयुः ॥ म-
हारुद्रजपे पूज्याः संतु मे नियमान्विताः । अक्रोधना शौचपराः सततं ब्रह्मचारिणः । रुद्रध्यान-
रता नित्यं प्रसन्नमनसः सदा ॥ अदुष्टभाषिणः संतु मा संतु परनिंदकाः ॥ ममापि निय-
मा ह्येते भवंतु भवतो मयि ॥ इति ब्राह्मणान्प्रार्थ्य इत्वा यथावत्कर्म क्रियतामित्याचार्य-
प्रत्युक्ता ॥ यथावज्जपः क्रियतामिति रुद्रजापकान्प्रतिवदेत् । ततो रुद्रजापकाः
रुद्रविधानोक्तप्रकारेण जपांगरुद्रस्नानभूतशुद्धिप्राणप्रतिष्ठा रुद्रन्यासान्कृत्वा पीठ-

आचार्यश्च मंडपार्थं भूमिपरीक्षापूर्वकं यजमानो वित्तभूमिपरिग्रहं कृत्वा शल्यनिरासपूर्वकं पूर्वं भूम्य
पेक्षया हस्तप्रमाणोच्छ्रितामर्द्धोच्छ्रितां वा समां भूमिं कृत्वा तस्यां मंडपकुंडादि कुर्यात् । मंडपं कुं
डं च होमांगमेव ॥ अनावश्यकं चेत्करणे फलाधिक्यं ॥ तत्र पूर्वं चिकीर्षितमंडपकुंडादीनां निर्विघ्नसि
ध्यर्थं गणेशपूजनमहं करिष्ये ॥ इति संकल्पं कृत्वा गणेशपूजनं कुर्यात् ॥ ततो देशकालकीर्तनानं
तरं मंडपकुंडादि कर्तुं भूमिकूर्मानंतपूजनमहं० ॥ कृत्वा भूम्यादिपूजनं कुर्यात् ॥ तद्यथा ॥
गंधादिपूजोपकरणानां स्वसमीपे स्थापनं । कूर्मपृष्ठे स्थितां शुक्लवर्णीं चतुर्भुजां पद्म
शंखचक्रमूलधरां प्रसन्नाननां भूमिं ध्यात्वा आगच्छ सर्वकल्याणि वसुधे लोकधारिणि
पृथिवी ब्रह्मदत्तासि काश्यपेनाभिनंदिते ॥ इति मंत्रेण भूमिमावाह्य ॥ ॐ भूम्यै नमः ॥ इति
सफलां पुष्पांजलिं दत्वा । उद्धृतासि वराहेण कृष्णेन शतबाहुना । दंष्ट्राग्रे लीलया देवि गंध
सिध्यर्थं जातिरूप + यज्ञार्थं प्रणमाम्यहं । इति मंत्रेण दण्डवत्प्रणम्य । ततः । एकस्मिन्पा
त्रे दधिदुग्धयवदूर्वा इत्यपुष्पाण्यर्घ्यं गृहीत्वा जानुभ्यामवनिं गत्वा ॥ ब्रह्मणा निर्मिते
देवि विष्णुना शंकरेण च । पार्वत्या चैव गणाय्यां स्कंदवैश्रवणेन च । यमेन पूजिते देवि
धर्मस्य विजिगीषया । सौभाग्यं देहि पुत्रांश्च धनं रूपं च पूजिता । गृहाणार्घ्यमिदं देवि
सौभाग्यं च प्रयच्छ मे ॥ एतावता मंत्रेणार्घ्यं दत्वा ॥ ॐ भूम्यै नमः । इत्यनेन मूलमंत्रेण गंधादिपंचो
पचारैः पूजनं । उपचारानिमांस्तुभ्यं ददामि प

रमेश्वरि । भक्त्या गृहाण देवेशि त्वामहं शरणं गतः ॥ इति निवेदनम् ॥२८॥

१३

13

ततो गंधपुष्पधूपाक्षतलाजाद्यैः कुंभिदीपसहितैः ॐ सर्वाधिवासायै भूम्यै बलिं समर्पयामि नमः॥ इति महा
बलिदानं॥ ततः कृतांजलिः वक्ष्यमाणश्लोकैः प्रार्थना॥ नंदने देववाशिष्ठे वसुभिः पूजया सह। जय
भार्गवदायादे प्रजानां जयमावह। पूर्णेभिरंगिरोदायादे पूर्णकामं कुरुष्व मे। भद्रे काश्यपदायादे कुरु भ
द्रां मतिं मम॥ सर्वविजयसमायुक्ते सर्वरत्नौषधीवृते। रुचिरे नंदने नंदे वाशिष्ठे रम्यतामिह॥ प्र
जापतिसुते देवि चतुरस्रे महायशे। सुभगे सुव्रते देवि गृहे काश्यपि रम्यतां। पूजिते परमाचार्यै
र्गंधमाल्यैरलंकृते। भवभूतिकरी देवि गृहे भार्गवि रम्यतां। अव्यक्ते व्याकृते पूर्णे शुभे चांगिरस
सुते। इष्टके त्वं प्रयच्छेष्टं त्वां प्रतिष्ठापयाम्यहं। देशस्वामिपुरस्वामिगृहस्वामिपरिग्रहे।
मनुष्यधनहस्त्यश्वपशुवृद्धिकरी भव॥ इति प्रार्थनम्॥ ततः कूर्माय नमः॥ अनेन मंत्रेण यस्य
कूर्म इत्यनेन वा गंधादिपंचोपचारैः पूजनं॥ ततः ॐ अनंताय नमः॥ अनेन मंत्रेण स्योना पृथिवी
अनेन वा तथैवानंतपूजनं। पृथिवीकूर्मानंतपूजने न्यूनातिरिक्तो यो विधिः स सर्वो [illegible] परिपू
र्णोस्तु। इति पूर्णताप्रार्थनं॥ आवाहनं न जानामि॥ ० पर्यस्य ता च०॥ इति भूम्यादिपूज
नं॥ ततः आचार्यः प्राचीसाधनपूर्वकं स्वाभिमतमंडपप्रमाणं चतुरस्रं सूत्रं दत्वा प्रागप
दक्षिणोत्तरसूत्रचतुष्टयदानेन मंडपभूमिं नवकोष्ठां तु कृत्वा ऽग्नेयकोणमारभ्य सकल

ऽदृढवंशासुभिः पूरयित्वा प्रोक्षाचारात् स्तंभे पोटलीं बध्वा गंधपुष्पमालादिभिरलंकृत्य यतो मूर्तः समीहस इति
प्रार्थयेत् ॥ ततः प्रदक्षिणक्रमेण वास्तुवेष्टेषु सर्वस्तंभरोपणं ततो मंडपमध्यकोष्ठचतुःकोणेषु आग्नेयादिक्र
मेणोत्तममंडपविस्तारार्धप्रमाणकृतचूडस्तंभचतुष्टयरोपणं ॥ मध्यस्तंभचतुष्टयचूडासु उभयाग्ररंध्र
युक्तवलिकाख्यकाष्ठचतुष्टदानं ॥ बाह्यस्तंभेष्वधिकर्णसंपादनेन वा प्रतिदिशं काष्ठत्रयस्थापनं वेदिकोण
स्तंभबाह्यस्तंभकोणयोरेकैकभित्तिकोणे चतुष्टये काष्ठचतुष्टयस्थापनं ॥ तदनंतरं यथा उपर्याच्छादनं
कर्तुं शक्यते तथा प्रतिदिशं अन्यानि काष्ठानि दत्त्वा स्थापयित्वा मध्यस्तंभचतुष्टयोपरि छिद्र स्वरा
कारसंपादनं । ततः प्रागादिक्रमेण चतुर्दिक्षु द्वारचतुष्टयकरणं । तत्र प्रतिदिशं ऊर्ध्वकाष्ठद्वयस्य पं
च हस्तपरिमितस्य पंचमांशेन निखननं तदुपरि अधमे मंडपे प्रांतद्वय छिद्रयुक्त हस्तद्वयपरि
मित तिर्यक्काष्ठदानं । मध्यमे च चतुरंगुलाधिकहस्तद० ॥ तउत्तममंडपे अष्टांगुलाधिकहस्त० ।
नं । ततो द्वारवर्जं सर्वस्यापि मंडपस्योपर्यधश्च नारिकेलादिदलकैर्वा शोभनैर्दर्भैरन्यैः पल्ल
वैर्वा वेणुभिर्वा कटैर्वा आच्छादनं । ततो मध्यस्थितस्तंभचतुष्टयमध्ये कुंडं कुर्यात् । कुंडस्यै
शान्यां ग्रहपूजनार्थं हस्तपरिमितवेदिकासंपादनं ॥ तदुत्तरतः रुद्रपीठदेवतापूजना
र्थं हस्तपरिमितां द्वितीयां वेदिकां कुर्यात् ॥ ततः प्रागादिद्वारेभ्यो बहिः हस्तपरिमिते देशे

२४

14

वा कश्मीरदेशोद्भवा वा तदभावे जंबूखदिरतालवृक्षान्यतमे भवा । अधमादिषु क्रमेणैवं च षट् सप्त हस्तोच्छ्रायाद्धि
द्रहिताः सरलाः समवृत्ताः अग्रादौ भूताश्चित्तालंकृतसहिताः प्रतिदिशं युगलं युगलं स्वस्वं च मांशेन नि
खेयाः तासां चूडा सूक्ष्मेण हस्तद्वयस्य पादहस्तद्वयं सार्धहस्तद्वयं वा परिमितानि दैर्घ्ये र्ध्वपरिमितानि वा
उभयाय छिद्रयुक्तानि शाखायां तो दृढान्येव तिर्यक्काष्ठानि विलनिवेशनस्थापनीयानि तत्र अधमे
नवांगुलं दैर्घ्ये मध्यमे एकादशांगुलं उत्तमे त्रयोदशांगुलं । त्रिष्वपि स्वस्वदैर्घ्ये चतुर्थांशेन विस्तारः । द्व्यं
गुलं त्र्यंगुलं चतुरंगुलं च क्रमेण विनिवेशनं मूलस्य मध्ये गर्तं कृत्वा कर्तव्यं । पार्श्वद्वयगतं तु किंचिद्
क भित्ति । ततः सदलं सफलैर्नारिकेलक्रमुककादलीन्यतमस्तंभे दीपैर्ध्वजैश्चित्रवस्त्रबंधनैश्चामरै
र्घंटिकाभिर्मीडोच्छ्रायैश्च सकलस्तंभालंकरणं । वितानचामरपट्टकूलपुष्पमालादर्पणघं
टिकामत्स्यखाद्यनानाविधफलपल्लवैश्च मंडपस्यालंकरणं । उक्तालंकरणसंभवे पुष्पमाला
पल्लवैर्वा मंडपालंकारो वृक्षं संपादनीयः । अनु साधनैर्युक्त इत्यादिना दोषश्रवणात् । एवं मं
डपं संपाद्य तन्मध्ये पूर्वपश्चिमोत्तरे शानीनामन्यतमदिशि होमानुसारेण कंठमेखलायोनि
स्या= नाभिरवात युक्तं मनोरमं कुंडं कुर्यात् । रुद्रे होमस्यानेकप्रकारत्वात् हस्तनियमो न लिखि
ताः यदा पूर्वं ग्रहयज्ञेन कृत हस्त तदर्थ मपि । हस्तमात्रं चतुरंगुलविस्तृतोच्चैकमेखला
युक्तं खातकुंडं योनिनाभियुक्तं कुंडं कर्तव्यं ॥ चिंतामणिकारमते मेखलागयं ॥ तत्रप्र

प्रथममेखला अंगुलद्वयोच्चा द्वितीया अंगुलोच्चा उभयोरपि द्व्यंगुलो विस्तारः ॥ ॐ ॥

तृतीया तु उच्छ्राय विस्तारभ्यां चतुरंगुला । यानि स्रुक् वित्तस्तिरीर्थावट् सप्तान्यतरांगुलविस्तृता मध्ये कूर्मपृष्ठोन्नता गजोष्ठसदृशी कार्या । कुंडाशक्तौ तु एक हस्तादि प्रमाणं । चतुरस्रं तत्र द्रोमेखलं स्थंडिलं कार्यं । स्थंडिले च मेखलादि न भवति । अंगुलोत्सेधं च तु रहस्त्वादिना नेशकोंद्यादिदोषाच्चेति संदेहः ॥ तस्य ऐशान्यां ग्रहादिस्थापनार्थं हस्तमात्रविस्तृता वितस्तिप्रमाणोच्छ्राया मेखलाद्वययुक्ता चतुरस्रा वेदिका कार्या ॥ तत्र द्व्यंगुलोच्छ्रिता प्रथममेखला ॥ एकांगुलोच्छ्रिता द्वितीया मेखला द्वयोरप्येकैकांगुलो विस्तारः ॥ एवमेव तदुत्तरतो रुद्रवेदिका आग्नेयकोणे पिवा स्रुक् योगार्थं हस्तमात्रं त्रिमेखलं कुंडं कार्यं ॥ इति रुद्रपद्धतौ जपारंभदिनकृत्यं समाप्तम् ॥ ५ ॥

अथ रुद्रजापकृत्यं ॥ तत्र ब्राह्मे मुहूर्ते उत्थाय चरणकरवदनक्षालनाचमनादिभिस्तत्कालशुद्धिं विधाय स्वासने उपविश्य महादेवचिंतनं कुर्यात् ॥ तद्यथा ॥ प्रातः स्मरामि शिवमेकमनंतवीर्यं वेदांतवेद्यमनघं पुरुषं पुराणं ॥ नामादिभेदरहितं रहितं च भावैः संसाररोगहरमौषधमद्वितीयं ॥ १ ॥ प्रातर्नमामि गिरिशं गिरिजार्धदेहं सर्गस्थितिप्रलयकारणमादिदेवं । विश्वेश्वरं विदितविश्वमनोभिरामं संसाररोग० ॥ २ ॥ प्रातर्भजामि भजतामभयंकरं तं गंगाधरं वृषभवाहनमंबिकेशं । खट्वांगशूलवरदाभयहस्तमीशं संसा० यं० ॥ ३ ॥ लोकत्रयमिदं पुण्यं यः पठेत् प्रातरुत्थितः । सर्वान् कामानवाप्नोति शिवलोके महीयते ॥ ४ ॥ ततः प्राणायामत्रयं ॥ गुरुचरणारविंदाभ्यां नमः ॥ इति गुरुनमस्कारः ॥ जयमेव शिव शर्व त्र्यक्ष दक्षार्चितांघ्रे स्मरहर मृडशंभो धूर्जटे व्योमकेश । वरद करुणां मे मोहविध्वस्तमूर्ते

२५

15

श्रीमहारुद्रजपयज्ञार्थं ममानुज्ञां दातुमर्हथ । इति मनसानुज्ञाप्रार्थनं ॥ ततो यथाविधि मूत्रपुरीषोत्सर्गशौचाचमनदंतधा
वनादि कुर्यात् ॥ ततो मृद्गोमयकुशतिलपुष्पादिस्नानोपकरणान्यादाय महारुद्रनामोच्चारणं कुर्वन् स्नानार्थं
नद्यादितीर्थगमनं । तीरं प्रक्षाल्य तत्र मृदादीनां स्थापनं ॥ ततः स्वशाखोक्तविधिना पादप्रक्षालनादि अघमर्षणां
तस्नानकरणं ॥ आचमनं ॥ ॐ नमो भगवते रुद्रायेति स्वनासिके निरुध्य इममेव रुद्रमंत्रवारत्रयं जपेत् ॥ इति प्रा
णायामत्रयं ॥ ततः ॐ नमो भगवते रुद्रायेति दशाक्षरमंत्राक्षरैः षडंगः ॥ ॐ हृदयाय० नमो शिरसे भगं शि
खा० वते कव० रुद्रा ने० यं अस्त्र० ॥ ॐ नमो रुद्रायेति षडक्षरे एवं षडंगः ॥ ॐ हृ० नं शि० मों शि० रु
क० द्रां ने० यं अ० फट् । ततो देशकालकीर्तनं । श्रीमहारुद्रप्रीत्यर्थं रुद्रपूजाजपांगस्नानमहं क
रिष्ये इति संकल्पः ॥ तस्मिन् जले श्रीमहारुद्र अस्मिन् जले संनिहितो भव इति मनसा सन्निधान
भावनं । गंगे च० यो भव इति मंत्रेण दक्षिणकरांगुष्ठेन प्रादक्षिण्येन तत्रावर्तनं ॥ अंकुश
मुद्रया तीर्थावाहनं । व भित्यनेन धेनुमुद्रया आप्लावनं । कवचेनावगुंठनं । अस्त्रेण संरक्षणं ॥
ॐ नमो० येति दशाक्षरे लोकादशवारं हस्तेन जलाभिमंत्रणं ॥ अस्त्रेणात्मानमभितो जलप्रक्षेपेण
त्मरक्षाकरणं ॥ श्रीरुद्रं ध्यायन् ॥ ॐ नमः संभवे इति मज्जनं ॥ तमेव ध्यायन् पुनर्नमः शंभवे इति मंत्रं
पठित्वोन्मज्जनं ॥ द्विराचमनं ॥ असंख्याता सहस्राणीति दशभिः । ॐ नमो भ० यत्यकादश
शो न चेत्यकादशभिर्मंत्रैः कलशमुद्रया प्रतिमंत्रे मात्मनोऽभिषेचनं । ततो जलतर्पणादि स्नान

उत्तीर्य पादौ जले स्थले कृत्वा द्विराचमनं । ततो धौतवाससी परिधाय द्विराचमेत् । ततस्त्रिपुंड्रधारणं ॥ सित भस्म स
जलं सव्यहस्ते गृहीत्वा दक्षिणहस्तेन कूर्ममुद्रया ऽवष्टभ्य मूलमंत्रेण सद्योजातादि पंचब्रह्ममंत्रैर्वा नमः शंभवे
त्यनेन वा अग्निरिति भस्मेत्यादिना वाऽभिमंत्र्य ललाटे हृदये नाभौ ग्रीवायां बाहुमूलयोः कूर्परे मणिबंधे
नैच पृष्ठदेशे च मूर्ध्नीत्येतत्स्थानेषु क्रमेणोक्तस्थानेषु त्रिपुंड्रं धारणं । ललाटे तु मध्यमावर्जे तर्ज
न्यनामिकांगुष्ठैरिति विशेषः । प्रकारांतरेण ईशानेन शिरोदेशं मुखं तत्पुरुषेण तु । अघोरेण च
हृदयं उरूवामेन सेवयेत् । सद्येन पादयोश्चैव त्रिपुंड्रं धारयेत्ततः । ॐ ब्रह्मणे नमः ललाटे । ॐ स्कंद
यनमः नाभौ । ॐ अग्नये नमः हृदये । ॐ वृषभाय नमः कंठे । ॐ रुद्राय नमः दक्षिणबाहुमूले । ॐ आदि
त्याय नमः । दक्षिणकूर्परे ॐ चंद्राय नमः दक्षिणमणिबंधे । ॐ वामदेवाय नमः । वामबाहुमूले ।
ॐ प्रभंजनाय नमः । वामकूर्परे । ॐ वसुभ्यो नमः । वाममणिबंधे । ॐ हरये नमः पृष्ठे ॥ ॐ आत्म
नेनमः स्कंधे । ॐ परमात्मने नमः शिरसि । ततो यथाशक्त्या विधि रुद्राक्षधारणं ॥ ततः स्वशाखो
क्त विधाना अर्घ्यं ततः प्रातः संध्या । ततः श्री रुद्ररूपां संध्यां मनसा ध्यात्वा जलिनोदक मादा
यो त्थाय तिष्ठन् असौ यस्ताम्रो इति मंत्रमुच्चार्य श्री रुद्ररूपं मनसा चिंतयन् रुद्ररूपायार्घं
नम इत्युक्त्वा जलिस्थं स्थमुदकं मूर्ध्वं आदित्याभिमुखं प्रक्षिपेत् । ततः सूर्योपस्थानादि त्रि

२६

16

ततस्त्वासाद्य पात्रे तीर्थोदकं गृहीत्वा मौनीभूत्वा तत्स्थानाद्दूरतः श्वापदादिभयरहिते बहुजनवर्जिते देवालये पर्वत
मस्तके समुद्रगानदीतीरान्यतमे शुद्धरूपे स्थाने प्रतिगमनं ॥ तत्र शुद्धायां भूमौ गोचर्मपरिमितं देशं परिकल्प्य
तस्मिन्देशे कुंकुमस्वरागेण विलिखेच्च पंचशं पूर्वकादीन्वर्णान्क्रमशः ईदृशीशो स्थानाधिपस्यान्तरमस्ती
यत्र तं दीपदेशं मुनयो वदन्ति १ ॥ इत्युक्तलक्षणलक्षितं शुद्धस्थानं प्रकल्प्य ॥ तत्र गोमयादीनां चतुरस्रमंडलका
रणं ॥ तदुपरि प्राग्गन्त्रमुदग्गन्त्रं वा कुशत्रयास्तरणं । तदुपरि यथाक्रमानुसारेण व्याघ्रादिचर्मास्तरणं । तदुपरि
मृदुवस्त्रास्तरणं तदभावे केवलस्य चित्रकंबलस्य वास्तरणं । ततस्तीर्थोदकेनार्घपात्रस्य पूरणं । तस्मिन्नु
दके गंधपुष्पादिप्रक्षेपः । तदुदकं ॐ नमो भगवते रुद्रायेति दशाक्षरेण मंत्रेण वारत्रयमभिमंत्र्य स्वदक्षिण
करेण स्वल्पं गृहीत्वा स्वशिरः प्रोक्ष्य पुनः स्वल्पमादाय तेन पूजार्थमाहृतानि गंधादिद्रव्याणि भूमिं च
प्रोक्षयेत् । ॐ धात्रे नमः । इति द्वारदक्षिणभागे पूजनं । ॐ धात्रे नम इत्युत्तरे । ॐ उदुंबराय नम इत्यूर्ध्वशा
खायां । ॐ देहल्यै नम इति द्वारस्याधः । ततो वक्रदृष्ट्याऽवलोकितेनांतरिक्षगतं भूतसंघस्य बहि
र्निर्गमनार्थं वामभागसंकोचनेन मार्गं दत्त्वा वामपादपुरःसरं पूजागृहप्रवेशनं गेहमध्ये । ॐ वास्तु
पुरुषाय नमः । इति पूजनं । आसनोपरि ॐ आधाराय नमः । ॐ आधारशक्त्यै नमः । ॐ सर्वशक्ति
सहिताय कमलासनाय नमः इति क्रमेण पूजनं ॥ ततस्तस्मिन्नासने स्वयमुपवेशनं स्ववामभागे प्रत्यो
दकलशस्थापनं ॥ स्वदक्षिणभागे घंटादिपूजोपकरणस्थापनं । स्वपुरतः । गंधादिपात्राणां ह स्थापनं ।

रीयद्वयस्थापनं ॥ हस्ते सर्षपानुगृहीत्वा ॥ अस्त्रमंत्रेणाभिमंत्र्य । रक्षोहणं वलगहनं । रक्षोहणो च ० । रक्षसां भागः । रक्षोह
विश्वचर्षणि ० । ॐ अपसर्पंतु ये भूता ये भूता भूमिसंस्थिताः । ये भूता विघ्नकर्तारस्ते नश्यंतु शिवाज्ञया ॥१॥ एभिर्मं
त्रैर्दिग्विदिक्षु सर्षपविकिरणेन भूतोत्सारणं । आचमनं । दशाक्षरमंत्रेण प्राणायाम । अद्येह देशकालकीर्तनं ॥
अशेषपापक्षयकामोहं धर्मार्थकाममोक्षान्यतमफलकामो वा परमेश्वरप्रीतये अमुकरुद्रजपमहं करिष्ये ॥
तदंगतया विहितं भूतशुद्धिप्राणप्रतिष्ठादिकं करिष्ये इति । स्वयं जपकरणपक्षे संकल्पः । यजमानार्थं जप
करणपक्षे तु अमुकशर्मणो यजमानस्यानुज्ञया जपमहं करिष्ये । इति विशेषः । दक्षिणांसे सरस्वत्यै नमः ॥
शंखनिधये नमः । वामभागे ॐ लक्ष्म्यै नमः । ॐ पद्मनिधये नमः । पृथिवीति मंत्रस्य मेरुपृष्ठ ऋषिः कूर्मो देव
ता सुतलं छंदः आसने विनियोगः । ॐ पृथिवी त्व० कुरु चासनं । ॐ विश्वशक्त्यै नमः ॥ ॐ मायाशक्त्यै नमः ॥
ॐ भूर्भुवः स्वः ॐ आत्मासनाय ० । अनेन मंत्रेण पुष्पादिनात्मनः आसनदानं । ऊर्ध्वकेशि ० । इति
शिखाबंधनं ॥ अपक्रामंतु भूतानि पिशाचाः सर्वतो दिशं । सर्वेषामविरोधेन ब्रह्मकर्म समारभेत ॥
सर्वभूतनिवारकाय शार्ङ्गाय सशराय सुदर्शनाय अस्त्रराजाय हुं फट् अनेन तालत्रयं कृत्वा स्वस्वपरि
तः सर्वदिक्षु अस्त्रमुद्राप्रदर्शनं ॥ अथ दक्षिणभागे ॥ ॐ गुरुभ्यो नमः । ॐ परमगुरुभ्यो ० । ॐ परा
त्परगुरुभ्यो ० । ॐ पूर्वसिद्धेभ्यो ० । ॐ आचार्येभ्यो नमः । स्ववामभागे । ॐ गणेशाय नमः ॥ ॐ दुर्गायै ० ।
ॐ क्षेत्रपालाय ० । ॐ योगिनीभ्यो ० । क्षेत्रेशाय ० । अपसर्पंतु ये भूता ० । अनेन मंत्रेण स्ववामपार्ष्णि

ति वातां सर्षभस्मति कुर्यात् ॥

१७ (७)

भूरसीत्यस्य प्रजापतिऋषिः प्रस्तारपंक्तिश्छंदः स्वयमातृण्णा देवता भूशुद्धौ वि०॥ भूमौ हस्तं दत्त्वा भूरसीति मंत्र
जपः। यो भूतानामिति मंत्रस्य कौडिन्य ऋषिः त्रिष्टु० नारायणो दे०। भैरवनमस्कारे वि०। ॐ यो भूताना-
म०। ॐ देवभूताधिपतये भैरवाय नमः। इति भैरवनमस्कारः॥ ततो दशाक्षरेण प्राणायामः। इति भू-
शुद्धिः। ततः स्वहृदये धर्मकंदसमुद्भूतं ज्ञाननालं वैराग्यकर्णिकं ऐश्वर्याष्टदलं परमशोभनं कम-
लमधोमुखं। अस्ति इति भावनं॥ ततः ॐ मित्युच्चार्य प्रणवेन तत्कमलमूर्ध्वमुखं जातमिति भावनं
। ततः ॐ इत्युच्चार्य तत्कमलकर्णिकामध्ये चैतन्यात्मकः। प्रदीपकलिकाकारो जीवैव तिष्ठतीति
समूलाधारादुत्थितया विद्युत्सहस्रप्रभाभास्वरया बिसतंतुसदृशया सुषुम्णामार्गेण हृदयकम-
लमागते कुंडलिन्या मुखे गृहीत्वा द्वादशांतस्थित सहस्रकमले प्रतिनीते तेन तत्रत्य परमात्मना स-
ह एकीभूत इति भावनं॥ ततः क्षकारे क्षलयः लकारे ललयः हकारे हलयः सकारे सलयः ष-
कारे षलयः शकारे शलयः वकारे व० इत्यादि अकारे अ०। ॐकारपर्यंतं लयं भाव इत्वा। ॐ-
कारः सहस्रांबुजब्रह्मरंध्रे लयं गत इति भावनं। ततः पादादि जानुपर्यंतं चतुरस्रं पीतं पृथि-
वीमंडलं तत्र पादगमनक्रिया गंतव्य गंध घ्राण पृथिवी ब्रह्म निवृत्ति समानवायवः संति
इति भाव इत्वा। ॐ ह्रौं ब्रह्मणे पृथिव्यधिपतये निवृत्तिकलात्मने हुं फट् स्वाहा॥ इति मंत्र

पु स्वार्यते सर्वे कुंडलिनी द्वारा ब्रह्म लयं गता ॥ इति भावनं ॥

ततो जान्वादि मे नाभिपर्यंतं शुक्लमर्धचंद्राकारं वारुणमंडलं तत्र हस्तादानादातव्यरसरसनाजलविष्णुप्रतिष्ठादानवायवः
संतीति भावयित्वा। ॐ ह्रीं विष्णवे जलाधिपतये प्रतिष्ठाकलात्मने हुं फट् स्वाहा इति मंत्रमुच्चार्य ते सर्वे कुंडलिनीद्वा
राग्नौ लयं गता इति भावनं। ततो नाभ्यादि हृदयपर्यंतं त्रिकोणं रक्तं वह्निमंडलं तत्र पायुविसर्गविसर्जनीयरू
पचक्षुस्तेजोरुद्रविद्याव्यानाः वायवः संतीति भावयित्वा ॐ ह्रूं रुद्राय तेजोधिपतये विद्याकलात्मने हुं फट्
इति मंत्रमुच्चार्य ते सर्वे कुंडलिनीद्वारा वायौ प्रलयं गता इति भावनं ॥ ततो हृदयादि भ्रूपर्यंतं कृष्णं वर्तुलं
षट्बिंदुलांछितं वायुमंडलं तत्रोपस्थानंदतद्विषयस्पर्शत्वग्वायुईशानशांत्यपानाः संतीति भावयित्वा
ॐ ह्रैं ईशानाय वाय्वधिपतये शांतिकलात्मने हुं फट् मंत्रमुच्चार्य ते सर्वे कुंडलिनीद्वारा आकाशे लयं गता
इति भावनं ॥ ततो भ्रूमध्यादि ब्रह्मरंध्रपर्यंतं स्वच्छं वर्तुलमालाकाशमंडलं तत्र वाग्वादनवक्तव्यशब्द
श्रोत्राकाशसदाशिवशांत्यातीतप्राणाः संतीति भावयित्वा। ॐ ह्रौं सदाशिवायाकाशाधिपतये
शांत्यातीताकलात्मने हुं फट् स्वाहा इति मंत्रमुच्चार्य ते सर्वे अहंकारे लयं गता। इति भावनं ॥ ततो
हंकारे महत्तत्त्वे लयं गतः। महत्तत्त्वं मातृकासंज्ञकशब्दब्रह्मस्वरूपायां हृल्लेखार्थभूतायां प्रकृतौ
लयं गतः। तथाभूता प्रकृतिर्नित्यशुद्धबुद्धस्वभावे स्वप्रकाशे सत्यज्ञानानंदलक्षणे परमकारणे परे
ब्रह्मणि लयं गतेति भावनं ॥ ततः शरीरस्यांतर्यामिरूपिः प्रकृतिपुरुषच्छेदः सत्यदेवता स्वशरीर
पापपुरुषं विशोषयेत् ॥ इत्युक्त्वा प्राणापानौ निरुध्य मम दक्षिणकुक्षौ ब्रह्महत्याशिरस्कः सुवर्ण
स्तेयभुजद्वयो युगुलः सुरापानहृदयो गुरुतल्पकटिद्वयः तत्संसर्गिपदद्वयगुलः पातकोपपातक
तः

अंगुष्ठसंकीर्णभ्रुकुटिकादिशिरसंधिश्च वयोरक्तस्म
श्रुश्च विलोचनो भीमदंष्ट्राकरालः खड्गचर्मधरः पिंग
जोर्ध्वकेशः कज्जलप्रभः पापपुरुषः स्थित इति भावनं ॥

ततोयं इति वायुवीजस्य कण्व ऋषिर्जगती छंदः० सर्वभूतांतर्यामी वायुर्देवता पापपुरुषशोषणे विनि०। नाभौ दशपत्रं कमलं
दशाक्षर विंदुलांछितं। तन्मध्ये वर्तुलं वायुमंडलं धूम्रवर्णं तत्र स्फुरत् यं वीज इति भावयित्वा। वामनासापुटेन
ॐ यं वायुं पूरयेत्। ॐ यं ॐ इति षोडशवारं जपित्वा वायुं कुंभयन् द्वादशवारं जपित्वा दक्षिणनासापुटेन वायुं रेचयेत्। षड्वा
रं जपित्वा तस्माद्वीजाद् उत्थितेन प्रचंडवायुना साधिष्ठानं पापपुरुषं शोषयामीति भावनं॥ रं इति वह्नि
वीजस्य कश्यप ऋषिः जगती छंदः वैश्वानराग्निर्देवता साधिष्ठान पापपुरुषदाहे विनि०। हृदये द्वादशदलं
कमलं द्वादशाक्षर विंदुलांछितं तन्मध्ये त्रिकोणं वह्निमंडलं रक्तवर्णं ज्वालाज्वाजल्यमानं तत्र स्फुरत्
रंवीजं इति भावयित्वा वामनासिकया वायुं पूरयित्वा। ॐ रं ॐ इति द्वादशवारं जपित्वा वायुं कुंभयन्।
द्वादशवारं जपित्वा दक्षिणनासिकया वायुं रेचयेत्। षड्वारं जपित्वा तस्माद्वह्निवीजाद् उत्थितेन ज्वा
लासमूहेन साधिष्ठानं पापपुरुषं दाहयामीति भावनं॥ ततोयं इति वायुवीजं द्वात्रिंशद्वार मावृत्य
दक्षिणनासापुटेन साधिष्ठानेन पापपुरुषभस्म रेचयेत्। ततो वं इति वरुणवीजस्य हिरण्यग
र्भऋषिः०। निवृद् गायत्री छंदः०। वरुणो देवता०। भस्मावशोषितस्य पापपुरुषस्य प्लावने विनि०। कंठे षो
डशदलं षोडशाक्षर विंदुलांछितं तत्र अर्धचंद्राकारं वरुणमंडलं चंद्रसहस्रप्रतीकाशं तत्र
स्फुरत् वंवीजं इति भावयित्वा वामनासिकया वायुपूरणपूर्वकं कुंभकं कृत्वा। ॐ वं ॐ इति द्वादश
वारं जपित्वा पुनर्वायुं पूरयन्। षड्वारं जपित्वा दक्षिणनासिकया वायुं रेचयेत्। षड्वारं जपित्वा मूला
धारात् कुंडलिनी शक्तिमुत्थाप्य सुषुम्नामार्गेण द्वादशांतगतां विभाव्य तत्स्थं संगलित वंवी
डं=२

२८

18

परमात्मादे० पुनर्नूतनशरीरन्निमीलेण० वृं मूलाधारे पार्थिवमंडले चतुरस्रे चतुर्विंदुलांछितं पीतवर्णं ब्रह्म
दैवतं गंध तन्मात्रं तत्रस्फुरल्लं वीजो त्थितकाठिन्येन शरीरं दृढं जातमिति भावयित्वा भ्रूमध्ये हस्तं दत्त्वा लं वी
जं द्वादशवारं जपेत् । ततोहमित्यादि का शवीजस्य हंस ऋ० अनुष्टु० सदाशिवरुदे० देहसुखस्वकरणेवि नियो
गः ॥ ललाटे द्विदले वज्रं षडुत्तर विंदुलांछितं तन्मध्ये वर्तुलं व्योममंडले सुनीलप्रभे वासुदेवदैवं शब्दत
न्मात्रं तत्र स्फुरत् हं वीजं इति स्मरन् ललाटे हस्तं दत्त्वा हं वीजं द्वादश वारं जपन् स्वदेहं सुरीभूतं इति भावनं सो
हमिति सदाशिववीजस्य सदाशिव ऋ० गाय० व्योवीहंसो देव० जीवस्थापने वि० ब्रह्मरंध्रे सहस्रदलं कमले
सहस्राक्षरं विंदुलांछितं गोक्षीर धवलं तत्र प्राणवायुं वेलेन मूलाधारात्पाया सुषुम्णामार्गेण मूलाधाराज्जात्वा
धिष्ठानं स्वाधिष्ठानान्मणिपुरकं मणिपूरकादनाहतं अनाहतादि शुद्धं विशुद्धेराज्ञाचक्रं आज्ञा
चदनाहतं प्रान्तं इति क्रमेण गतया सूक्ष्मभासा शक्त्या परमात्मनः सकाशात् जीवो हंसमानीतः
सोहं इति भावनं ॥ ततः ॐ हुँ फट् स्वाहा इत्युच्चार्य प्राणं संनिरुध्य मस्तके हस्तं दत्त्वा हौं वीजं द्वा
दशवारं जपेत् । ततः सच्चिदानंदरूपं नित्यशुद्धबुद्धमुक्तस्वभावं परिपूर्णब्रह्मैवाहमस्मि
इति जीवात्मनोरैक्यभावनं ॥ तस्मात्परब्रह्मणः सकाशात्प्रकृतिः प्रकृतेर्महान् महतोहंकारः
अहंकारादाकाशः आकाशाद्वायुः वायोरग्निः अग्नेरापः ॥ अद्भ्यः पृथिवी पृथिव्या ओषधयः ओष
धीभ्योन्नं अन्नाद्रेतः रेतसः पुरुषः समुत्पन्न इति स्वशरीरं । पुनर्जातमिति भावनं तस्मिन् शरीरे

अथ प्राणप्रतिष्ठामंत्रस्य ब्रह्मविष्णुरुद्रा ऋषयः ऋग्यजुःसामानि छंदांसि । क्रियामयवपुः प्राणाख्या शक्ति-
र्देवता प्राणप्रतिष्ठापने विनियोगः । ॐ कं खं गं घं ङं अं पृथिव्यप्तेजोवाय्वाकाशात्मने आं हृदयाय नमः ॥ ॐ
चं छं जं झं ञं इं शब्दस्पर्शरूपरसगंधात्मने ईं शिरसे स्वाहा । ॐ टं ठं डं ढं णं उं श्रोत्रत्वक्चक्षुर्जिह्वाघ्रा-
णात्मने ऊं शिखायै वषट् । ॐ तं थं दं धं नं एं वाक्पाणिपादपायूपस्थात्मने ऐं कवचाय हुं । ॐ पं फं
बं भं मं ओं वचनादानविहरणोत्सर्गानंदात्मने औं नेत्रत्रयाय वौषट् ॥ ॐ यं रं लं वं शं षं सं हं ळं क्षं मनोबुद्ध्यहंका-
रचित्तज्ञानात्मने अः अस्त्राय फट् । ॐ आं नाभेरधः । ॐ ह्रीं हृदयान्नाभिं । ॐ क्रों मस्तकाद्
हृदयं ॥ ॐ यं त्वगात्मने॰ हृदि । ॐ रं असृगात्मने नमः ॥ ॐ लं मांसात्मने नमः । ॐ वं मेदात्मने
नमः । ॐ शं अस्थ्यात्मने नमः हृदि । ॐ षं मज्जात्मने नमः । ॐ सं शुक्रात्मने नमः । ॐ हं प्राणात्म-
ने नमः । ॐ सः जीवात्मने नमः ॥ अथ ध्यानम् ॥ रक्ताम्भोधिस्थपोतोल्लसदरुणसरोजाधि-
रूढा कराब्जैः पाशं कोदंडमिक्षूद्भवमणिगुणमप्यंकुशं पंचबाणान् ॥ बिभ्राणा सृक्कपालं त्रिनय-
नलसिता पीनवक्षोरुहाढ्या देवी बालार्कवर्णा भवतु सुखकरी प्राणशक्तिः परा नः ॥ १ ॥ ॐ आं
ह्रीं क्रों यं रं लं वं शं षं सं हों हंसः मम प्राणा इह प्राणाः । ॐ आं ह्रीं क्रों यं॰ हंसः मम जीव इह स्थितो
जीवः । ॐ आं ह्रीं क्रों यं॰ हंसः मम सर्वेन्द्रियाणि । ॐ आं ह्रीं क्रों यं॰ हों हंसः मम वाङ्मन-
श्चक्षुःश्रोत्रघ्राणा इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा ॥ ततो हृदयं संस्पृष्ट्वा षोडशवारं प्रण-

वजपः कार्यः । ततो गर्भाधानादि षोडश संस्कारा
जाता इति भावयेत् ॥ इति प्राणप्रतिष्ठा ॥ ततो मूला-
धाराद् ब्रह्मरंध्रांतं बीसतंतुसदृशीं अनेककोटिवि-
द्युत्प्रकाशां कुंडलिनीं संभाव्य शिरोवश्यंती मध्यमा वैखरी ॥

रूपत्रिगुणिता प्रणवावयवैर्मातृकारूपेणवा ॥ इत्थं स्वजतीतिमावनं ॥ अथ प्राणायामत्रयं ॥ अकारादि षोड
शस्वरानुचरन् ॥ वामनासिकाया वायुं पूरयेत् ॥ ककारादिपंचविंशतिस्वर्णानुचरन् वायुं कुंभयेत् ।
यकारादि क्षकारांतानुचरन् वायुं रेचयेत् । पुनस्तथैव दक्षिणनासिका पूरयेत् । तथैव कुंभयेत् । तथै
व वामनासिकया रेचयेत् । पुनस्तथैव । वामनासापुटद्वयेन पूरयेत् । तथैव कुंभयेत् । तथैव रेचये
त् ॥ इति प्राणायामत्रयं ॥ अस्य सृष्टिमातृकामंत्रस्य ब्रह्मा ऋषिः गायत्री छंदः सृष्टिमातृकासर
स्वती देवता । हलो बीजानि स्वराः शक्तयः सृष्टिमातृकान्यासे विनि० ॥ ब्रह्मा ऋषिः शिरसि । गाय
त्री छंदो मुखदेने मातृकासरस्वती देवता हृदयो हलो बीजानि गुह्ये । स्वराः शक्तयः पादयोः ॥ इति मा
तृकाकरषडादिन्यासः ॥ ॐ अं कं खं गं घं ङं आं अंगुष्ठाभ्यां नमः । ॐ इं चं छं जं झं ञं ईं तर्जनीभ्यां न
मः । ॐ उं टं ठं डं ढं णं ऊं मध्यमाभ्यां नमः ॥ ॐ एं तं थं दं धं नं ऐं अनामिकाभ्यां नमः । ॐ ओं पं फं
बं भं मं औं कनिष्ठिकाभ्यां नमः । ॐ यं रं लं वं शं षं सं हं ळं क्षं अः करतलकरपृष्ठाभ्यां नमः ॥ एवं हृद
यादि० ॥ अथ ध्यानम् ॥ पंचाशल्लिपिभिर्विभक्तमुखदोः पन्मध्यवक्षःस्थलां भास्वन्मौलि
निबद्धचंद्रशकलामापीनतुंगस्तनीं । मुद्रामक्षगुणं सुधाढ्यकलशं विद्यां च हस्तांबुजै
र्बिभ्राणां विशदप्रभां त्रिनयनां वाग्देवतामाश्रये ॥ अथ षडंगस्य मातृकान्यासः ॥ नपुंसका
नि करतलयोर्विन्यस्य । ततो दक्षिणकनिष्ठिकादि वामांगुष्ठांतमंगुलीषु षोडशस्वरा

करस्थमातृकान्यासः ॥ तद्यथा ॥ ॐ अं आं इं ईं उं ऊं ऋं ॠं ऌं ॡं एं ऐं ओं औं अं अः ॥ कं खं गं घं ङं चं छं जं झं ञं
टं ठं डं ढं णं तं थं दं धं नं पं फं बं भं मं यं रं लं वं शं षं सं हं क्षं ॥ पुनः पूर्वोक्तान्येव मातृकाक्षराणि ॥ ॐ अं आं इं ईं
उं ऊं ऋं ॠं ऌं ॡं एं ऐं ओं औं अं अः । कं खं गं घं ङं चं छं जं झं ञं टं ठं डं ढं णं तं थं दं धं नं पं फं बं भं मं यं रं लं वं
शं षं सं हं क्षं ॥ शरीरे व्यापयेत् । इति करस्थमातृकान्यासः ॥ अथान्तर्मातृकान्यासः ॥ ॐ अं आं इं ईं उं
ऊं ऋं ॠं ऌं ॡं एं ऐं ओं औं अं अः ॥ इति षोडशपत्रके कण्ठे ॥ ॐ कं खं गं घं ङं चं छं जं झं ञं टं ठं इति
द्वादशपत्रके हृदि ॥ डं ढं णं तं थं दं धं नं पं फं इति दशपत्रके नाभौ ॥ ॐ बं भं मं यं रं लं इति ष
ट्पत्रके लिंगमूले ॥ ॐ वं शं षं सं इति चतुःपत्रके पायौ ॥ ॐ हं क्षं इति भ्रूवोर्मध्ये ॥ इत्यन्तर्मातृका
न्यासः ॥ अथ बहिर्मातृकान्यासः ॥ ॐ अं नमः केशान्ते । ॐ आं नमो मुखवृत्ते । ॐ इं नमो दक्षिण
नेत्रे । ॐ ईं नमो वामनेत्रे । ॐ उं नमो दक्षिणकर्णे । ॐ ऊं नमो वामकर्णे । ॐ ऋं नमो दक्षिणनासा
पुटे । ॐ ॠं नमो वामनासापुटे । ॐ ऌं नमो दक्षिणगंडे । ॐ ॡं नमो वाम नासापुटे । ॐ एं नमः
ऊर्ध्वोष्ठे । ॐ ऐं नमः अधरोष्ठे । ॐ ओं नमः ऊर्ध्वदन्तपंक्तौ । ॐ औं नमः अधोदन्तपंक्तौ । ॐ
अं नमः । मूर्ध्नि । ॐ अः नमः आस्ये । ॐ कं नमो दक्षिणबाहुमूले । ॐ खं नमः कूर्परे । ॐ गं
नमो मणिबंधे । ॐ घं नमोऽङ्गुलिमूले । ॐ ङं नमो अङ्गुल्यग्रे । ॐ चं नमो वामबाहुमूले ।
ॐ छं नमो कूर्परे । जं नमो मणिबंधे । झं नमो अङ्गुलिमूले । ञं नमो अङ्गुल्यग्रे । टं नमो द

ॐ बं नमो दक्षिणपार्श्वे । ॐ फं नमो वामपार्श्वे । ॐ कं नमः पृष्ठे । ॐ भं नमो नाभौ । ॐ मं नमः उदरे । ॐ यं त्वगात्मने नमः हृदि । ॐ रं असृगात्मने नमः दोर्मूले । ॐ लं मांसात्मने नमः ककुदि । ॐ वं मेदात्मने नमः दक्षिणक क्षायां ॥ ५४ ॥

[illegible]

श्रीः २०

ॐ शं अश्वात्मने नमः वामकक्षायां । ॐ वं मज्जात्मने नमः हृदादि हस्तयोः । ॐ सं शुक्लात्मने नमः हृदयादि पा
दयोः । ॐ हं आत्मशक्त्यात्मने नमः हृदयादि जठरे । ॐ क्षं परमशक्त्यात्मने नमः हृदादि मुखे ॥ इति
वह्निमीत्रको न्यासः ॥ ॐ गौतमभरद्वाजाभ्यां नमः नेत्रयोः ॥ ॐ विश्वामित्रजमदग्निभ्यां नमः श्रोत्रयोः ॥
ॐ वशिष्ठकश्यपाभ्यां नमः नासापुटयोः ॥ ॐ अत्रये नमो वाचि । इति सप्तर्षिन्यासः प्रथमः ॥ ॐ गाय
त्र्यग्निभ्यां नमः शिरसि । ॐ उष्णिक्सवितृभ्यां नमो ग्रीवायां ॥ ॐ बृहतीबृहस्पतिभ्यां नमः पृष्ठवं
शे । ॐ बृहद्रथंतराभ्यां नेद्यावापृथिवीभ्यां नमः बाह्वोः । ॐ त्रिष्टुभिंद्राभ्यां नमः नाभौ । ॐ जग
त्यादित्याभ्यां नमः श्रोण्योः । ॐ अति प्रजापतिभ्यां नमो लिंगे । ॐ यज्ञायज्ञियवैश्वानराभ्यां न
मो गुदे । ॐ अनुष्टुब्विश्वेभ्यो देवेभ्यो नम ऊर्वोः । ॐ पंक्तिमरुद्भ्यो नमः जान्वोः । ॐ द्विपदा वि
ष्णुभ्यां नमः पादयोः । ॐ विछंदोवायुभ्यां नमः प्राणेषु ॥ ॐ न्यूनाक्षराभ्यां नमः हस्तद्वय विपर्यी
से नमस्तकायाः । ॐ विछंदोवायुभ्यां नमः प्राणेषु दिपादांतं ॥ इति छंदोन्यासो द्वितीयः ॥ अ
ग्नेजातादिति पंचानां परमेष्ठि ऋ० द्वयोर्मित्रष्टुप् छंदः अग्निर्देवता । षोडशीत्यादिति सः लोय
जुषां लिंगोक्ता देवता आवाहने जपे विनियोगः । चत्वारिशृंगेत्यावाहनमित्ति केचित् ॥ इवे
त्वादि एवं ब्रह्मांतेषु केषु चिन्मंत्रेषु विव

२१

21

रुद्रोदे०। कश्यपश्येतिनारायण ऋ० उष्णिक् आशीर्देवता। शिवोनामेत्यस्यप्रजापति०। यजुः रुद्रोदे० निवर्तयामीतिप्रजापतिऋ०
यजुर्लिंगोक्तादे०। त्र्यं० सोमेत्याद्यशोनामथिकं द्विकानांरुद्रमहर्षिरोजपेवि०। उग्रश्चेत्यस्यप्रजा० गाय० मरुतोदे० अग्नि
र्हृदयेनेत्यादिनिस्रूणांयजुर्षांप्रजाप० लिंगोक्तादे०। आयामायेस्वाहेत्यादितिस्रूणांयजुर्वोद ध्यंगापर्वण ऋ० लिंगोक्ता
दे०। उग्रश्चेत्यादिसप्तानांमथिरुद्रजपाजपेवि० इत्यार्षादिस्मृत्वा जपमारभेत॥ जपलक्षणं यथा॥ आदौषडंगानिएक
वारं अनंतरं नमस्त इत्यादि रौद्राध्याय स्यदशावृत्तयः। ततः पुनः सांगएक रूपावृत्तिः। तत्रतेत्र्यंसोमेत्यादि अष्टकं
द्विकामहर्षिरोजपः। तदनंतरं उग्रश्चेत्यादिसप्तरुद्रजपाजपः॥ इयमेकारुद्री॥ एवं यावदभिलषितंजपेत्
रुद्रैकादशभिस्तद लघुरुद्रः प्रकीर्तितः॥ एकादशैर्लि। एवं पंचसुरुद्रेषु श्रेष्ठस्यादुत्तरोत्तरः। जपानंतरं।
इमारुद्रायेत्यस्यकुत्सऋ०। जगती०। एकरुद्रोदेवता श्रीमहारुद्रहस्तेअर्घजलप्रक्षेपेवि०। ॐ इमारुद्राय०।
एतावद्रुद्रीसंख्याकेनजपेनअमुकप्रयोजनार्थं क्रियमाणेन श्रीभगवान्भवानीसहितो सेमहारुद्रः प्री
यताम्। इतिदेवदक्षिणहस्तेअर्घजलप्रक्षेपणं। ऋत्विग्द्वाराजपकरणे होमांते यजमानहस्ते ऋत्विग्भिः अ
र्घोदानं॥ अनंतरं यजमानेन इमारुद्रायेतिमंत्रेणदेवदक्षिणहस्तेजपनिवेदनं। ततोपीठदेवताविः
सर्जनादिकं कुर्यात्॥ इतिश्रीरुद्रपद्धतौरुद्रविधानं॥ एवमुक्तविधिनाभिलषितजपसमाप्तौ
जातायामाचार्योहोमारंभात्पूर्वंमंडपस्यदक्षिणभागेवास्तुमंडलेकृत्वातस्यपश्चिमतोहस्तमा

२८

28

गा=

अथ होमदिनकृत्यं ॥ तत्र यजमानः पूर्वं नित्यक्रियां निर्वर्त्य शुक्लाम्बरधरः शुक्लमाल्यानुलेपनः सुप्रक्षालित-
पाणिपादः स्वाचान्तः सपत्नीकः आचार्यऋत्विग्भिः सहितः पूर्णकलशाढ्यपाणिः फलदधिदूर्वामोगलिवाद्य-
हस्ताः सुवासिनीरग्रतः कृत्वा आ नो भद्रेत्यादि मन्त्रघोषेण शङ्खदुन्दुभ्यादिवादित्रघोषेण च मण्डपसमी-
पं गत्वा ॥ अर्घपात्रकरः ॥ अथ सामाय(?)त्यादि शान्तिपाठं पठन् मण्डपं प्रदक्षिणीकृत्य मण्डपपश्चिमद्वा-
रे स्थित्वा भूमिं पूजयेत् ॥ तद्यथा ॥ चतुर्भुजां शुक्लकेश(?)वर्णां कूर्मपृष्ठोपरि स्थिताम् ॥ पद्मशङ्खचक्रशूल-
धरां प्रसन्नां भूमिं ध्यात्वा ॥ आगच्छ सर्वकल्याणि वसुधे लोकधारिणि ॥ पृथिवी ब्रह्मदत्तासि काश्यपेना-
भिवन्दिता ॥ इति मन्त्रेण संप्रार्थ्य भूम्यै नम इति सकलोपस्थान(?) दत्त्वा ॥ उद्धृतासि वराहेण कृष्णेन शत-
बाहुना ॥ दंष्ट्राग्रे लीलया देवि यज्ञार्थं प्रणमाम्यहं ॥ इति दण्डवत् प्रणम्य ॥ अर्घपात्रं गृहीत्वा जानुभ्यां
धरणीं गत्वा । ब्रह्मणा निर्मिते देवि विष्णुना शङ्करेण च ॥ पार्वत्या चैव गायत्र्या स्कन्देन वैश्रवणेन च ।
यमेन पूजिते देवि धर्मस्य विजिगीषया ॥ सौभाग्यं देहि पुत्रांश्च धनं रूपं च पूजिता । गृहाणार्घ्य-
मिमं देवि सौभाग्यं च प्रयच्छ मे ॥ इति मन्त्रेणार्घ्यं दत्त्वा भूम्यै नम इत्यनेन भूरसीत्यनेन वा गन्धादि-
पञ्चोपचारैः संपूज्य । उपचारानिमान् तुभ्यं ददामि परमेश्वरि । भक्त्या गृहाण देवेशि त्वामहं
शरणं गत इति निवेदनं ॥ गन्धपुष्पपायसलाजासक्तुभिः दीपसहितैः ॐ सर्वपरिवारायै

गा=

अथ होमदिनकृत्यं ॥ तत्र यजमानः पूर्ववन्नित्यक्रियां निर्वर्त्य शुक्लाम्बरधरः शुक्लमाल्यानुलेपनः सुप्रक्षालित-
पाणिपादस्त्वाचान्तः सपत्नीकः आचार्यऋत्विग्भिः सहितः पूर्णकलशाक्षीपात्रफलदधिदूर्वागोमलिवाद्द्रव्य-
हस्ताः सुवासिनीर्गतैः कृत्वा आ नो भद्रा इत्यादिमंत्रघोषेण शंखदुंदुभ्यादिवादित्रैश्च घोषेण च मंडपसमी-
पं गत्वा ॥ अर्घ्यपात्रकरः ॥ अथ सा मूर्यतीत्यादि शांतिपाठं पठन्मंडपं प्रदक्षिणीकृत्य मंडपपश्चिमद्वा-
रे स्थित्वा भूमिं पूजयेत् ॥ तद्यथा ॥ चतुर्भुजां शुक्लकंचुकीं कूर्मपृष्ठोपरि स्थितां ॥ पद्मशंखचक्रमूल-
धरां प्रसन्नां भूमिं ध्यात्वा ॥ आगच्छ सर्वकल्याणि वसुधे लोकधारिणि ॥ पृथिवी ब्रह्मदत्तासि काश्यपेनो-
भिवंदिता ॥ इति मंत्रेण संप्रार्थ्य भूम्यै नम इति सकलोपचारान् दत्वा ॥ उद्धृतासि वराहेण कृष्णेन शत-
बाहुना ॥ दंष्ट्राग्रेलीलसे यो देवि यज्ञार्थं प्रणमाम्यहं ॥ इति दंडवत्प्रणम्य ॥ अर्घ्यपात्रं गृहीत्वा जानुभ्यां
धरणीं गत्वा ॥ ब्रह्मणाभिमते देवि विष्णुना शंकरेण च ॥ पार्वत्या चैव गायत्र्या स्कंदेनैरावणेन च ।
यमेन पूजिते देवि धर्मस्य विजिगीषया ॥ सौभाग्यं देहि पुत्रांश्च धनं रूपं च पूजिता । गृहाणार्घ्य-
मिमं देवि सौभाग्यं च प्रयच्छ मे ॥ इति मंत्रेणार्घ्यं दत्वा भूम्यै नम इत्यनेन भूरसीत्यनेन वा गंधादि-
पंचोपचारैः संपूज्य । उपचारानिमान् तुभ्यं ददामि परमेश्वरि । भक्त्या गृहाण देवेशि त्वामहं
शरणं गत इति निवेदनं ॥ गंधपुष्पपायसलाजासक्तुभिः दीपसहितैः ॐ संपरिवाराये

या॰

ग्रयप्रार्थना ॥ नंद नंद यशान्विष्ट्वसुभिः प्रजैः सह । जयभार्गवदायाद प्रजानां जयमावह ॥ पूर्णेङ्गिरसदायादे पूर्ण
कामं कुरुष्व मे ॥ भद्रे काश्यपदायादे कुरु भद्रां मतिं मम ॥ सर्वबीजसमायुक्ते सर्वरत्नौषधीवृते । रुचिरे नंदने नंदे वासिष्ठे रम्य
तामिह ॥ प्रजापतिसुते देवि चतुरस्रे महीयसि । सुभगे सुव्रते देवि गृहे काश्यपि रम्यतां ॥ पूजिते परमाचार्यैर्गंधमाल्यैरलं
कृते । भवभूतिकरे देवि गृहे भार्गवि रम्यतां ॥ अव्यक्ते चाकृते पूर्णे मुनेरांगिरसः सुते ॥ इष्टके त्वं प्रयच्छेष्टं त्वां प्रति
ष्ठापयाम्यहं ॥ देशस्वामिपुरस्वामिगृहस्वामिपरिग्रहे ॥ मनुष्यधनहस्त्यश्वपशुवृद्धिकरी भव ॥ इति प्रार्थना ॥ त
तो यजमानाचार्याः ऋत्विजो पश्चिमद्वारेण मंडपप्रवेशनं ॥ बल्यादि दक्षिणद्वारेण । पूर्वद्वारेण मंडपमध्ये होम
व्य॰ द्रव्यानयनं ॥ दानार्थस्य द्रव्यस्य दक्षिणद्वारेण नयनं ॥ पूजार्थसंभाराणां उत्तरद्वारेण नयनं ॥ ततो यजमा
नः ॥ प्रत्याय तना त्पश्चिमतः स्वासने उपविश्य आचमन प्राणायाम कालज्ञानादि कृत्वा ब्राह्मणद्वारा
कृतस्य अमुकरुद्रजपस्य दशांशेन अमुके द्रव्येण अमुक मंत्र विभागेन ब्राह्मणद्वारा होममहं करिष्ये ॥ तदं
ग गणेशपूजन मंडपस्थ देवता पूजन तोरणपूजादिकं चाहं करिष्ये । तदं । इति संकल्पः ॥ ततः पूर्ववद्गणे
शपूजनं । ततः आचार्यः भूमिमरागान्माता मोता मातरमप्यगात् ॥ भूमपुत्रैः पशुभिर्योनो द्वेष्टि स भि
द्यतां स्म पुत्रैः प्रजया पशुभिर्योनो द्वेष्टि स भिद्यतां ॥१॥ अनेन मंत्रेण भूमिस्पर्शी कृत्वा ॥ यथाविधि सं
पादितेन पंचगव्येन कुशोदैर्वस्यत्वेत्यादिभिः सिंच्यामीत्यं तेन मंडपमध्ये सर्वत्र प्रोक्षणं ॥ आपो हि
ष्ठेति त्र्यृचेन वा ॥ ततो गौरसर्षपान् लाजांश्च गृहीत्वा ॥ ततद्दिङ्मुखः स्थित्वा अग्नेत्राणाभमंत्र्य ॥

अपक्रामंतु भूतानि पिशाचाः सर्वतो दिशं । सर्वेषामविरोधेन ब्रह्मकर्म समारभे ॥२॥ इति मंत्रद्वयेन ॥ ॐ यं पुरो हरि
केशः ॥ नमोस्तु सर्पेभ्यः ॥ रक्षोहणो वलगहनः ॥ इत्यादिभिः स्वस्वशाखोक्तैः । राक्षोघ्नमंत्रैश्च तत्तद्दिक्षु स
र्षपलाजानां विकिरणं ॥ प्रकीर्णानां सर्षपलाजानां कुशैरीशान्यां राशीकरणं । तदुपरि यथाविधि करका
स्थापनं । तदुपरि ताम्रादिपात्रस्थापनं । तत्राष्टदलं कृत्वा तत्कर्णिकायां सूर्यं । पूर्वादिदलेषु परितः
सोमादिग्रहान् प्रणवव्याहृतिभिः आवाह्य । नाममंत्रैः संपूज्य । तां करकामादाय ॥ आनोभद्रेत्यादिमंत्रघोष
ण वाद्यघोषेण चैशानमारभ्येशानीपर्यंतं मंडपप्रान्तादाचरणं कुर्वमीत्यादि सततां धारां भ्रामयेत् ॥ ततः
कृतांजलिः स्वस्ति न इंद्र इति मंत्रं पठेत् ॥ देवा आयांतु । यातुधाना अपयांतु विष्णो देवयजनं रक्षस्व
ततो वेद्यां सर्वतोभद्रादि विरचयेत् । अग्रवास्तुपूजनं ॥ तद्यथा ॥ अथ वास्तुपूजनप्रयोगः ॥ तत्रायं क्रमः ॥
आचार्यः मंडपनैर्ऋत्यहोमार्थं स्थंडिलं विधाय तदीशानभागे हस्तमात्रांस्तदाचदि विधाय । ततो वेद्यां
वह्नेर्वा स्वर्णादिशलाकया नवरेखाः प्रागायताः कृत्वा । नवरेखा दक्षिणोत्तरायताः कृत्वा । मध्यको
ष्ठचतुष्टयमेकीकृत्य । ततः कोणेषु रेखा दद्यात् ॥ तेनाष्टपदानि संपद्यन्ते । मध्यमकोष्ठस्य पूर्व
दक्षिणोत्तरपश्चिमोत्तरस्यां द्विपदानि भवंति । एवं पंचचत्वारिंशद्देवतास्थानानि भवंति । बहि
रष्टौ चरक्यादीनां स्थापनानि भवंति ॥ एवं ~~पंचचत्वारिंशद्देवतो~~ मंडलं कृत्वा पंचरंगादिभिः लेखं ३

दक्षि=३

नैरृत्यपदार्धे अरुणं ॥ पश्चिमार्धे शुक्लवर्णं । वायव्यदक्षिणार्धे श्वेतवर्णं ॥ वायव्योत्तरार्धे शुक्लवर्णं ॥ ईशानपश्चिमार्धे गोक्षीरधवलवर्णं ॥ पूर्वार्धे जपाकुसुमवर्णं । ईशानदक्षिणार्धे शिरसि । उद्यद्दिनकराभं । तद्दक्षिणसार्धपदे अंजनसन्निभं । तद्दक्षिणपदद्वये अंजनसंकाशं । अमलधर्मकांतिं । रक्तं चित्रं । सार्धपदे बंधूकपुष्पाभं । आग्नेयपदार्धे कुंदपुष्पाभं । तत्पश्चिमार्धे धूम्रं । सार्धपदे रक्ताब्जसंकाशं । तदीयपश्चिमपदद्वये इंद्रवाभं । पदद्वये विद्युद्वर्णाभं । अंजनसन्निभं । पद्मरागाभं । सार्धपदे मंगाभं । नैरृत्यपदार्धे मेघवर्णं । उत्तरपदार्धे पावकवर्णं । सार्धपदे पीतवर्णं । पदद्वये नीलकंठाभं । पदद्वये चंद्राभं । स्फटिकाभं । मंगाभं । सार्धपदे उत्पलसंकाशं । उत्तरवायव्यपदार्धे इंद्रनीलाभं । तत्प्राक्पदार्धे कृष्णवर्णं । तत्प्राक् सार्धपदे शंखेन्दुसन्निभं ॥ पदद्वये मौक्तिकाभं । पदद्वये श्वेतपद्माभं । स्फटिकाभं । रक्तोत्पलाभं । सार्धपदे पीताभं । अर्धपदे कृष्णाभं । इति रंगैस्तत्तद्वर्णं संपाद्य ॥ वास्तुपूजां कुर्यात् ॥ यथा ॥ कर्ता प्राणानायम्य देशकालौ संकीर्त्य प्रारिप्सितस्य कर्मणः सांगतासिद्ध्यर्थं वास्तुपूजां करिष्ये । इति संकल्प्य । ततः वास्तुमंडपस्य ईशानादिकोणे चतुष्कोणे शंकुं चतुष्टयं दद्यात् ॥ तत्रायं क्रमः ॥ ओं विशंतु भूतले नागा लोकपालाश्च सर्वतः । मंडपेऽत्रावतिष्ठंतु आयुर्बलकराः सदा ॥१॥ अनेन चारोपयेत् । एवं त्रिः । ततः । आग्नेयादि शंकुपार्श्वेषु माषभक्तबलीन् दद्यात् । तत्रायं क्रमः ॥ अग्निभ्योऽप्यथ सर्पेभ्यो ये चान्ये तान् समाश्रिताः । तेभ्यो बलिं प्रयच्छामि पुण्यमोदनमुत्तमं ॥२॥

३०

ॐ नैरृत्याधिपतिश्चैव नैरृत्यां ये च राक्षसाः । बलिं तेभ्यः प्रयच्छामि सर्वे गृह्णन्तु मंत्रितं ॥२॥ ॐ नमो वायुरक्षे
भ्यो ये चान्ये तान्समाश्रिताः बलिं तेभ्यः प्रयच्छामि पुण्यमोदनमुत्तमं ॥३॥ ॐ रुद्रेभ्यश्चैव सर्वेभ्यो ये चान्ये
तान्समाश्रिताः । बलिं तेभ्यः प्रयच्छामि गृह्णन्तु सततोत्सुकाः ॥४॥ ततः नवरत्नदेवताः प्रागाद्यताः पूजयेत्
॥ ॐ श्रीं त्यै नमः । ॐ यशोवत्यै नमः । ॐ कांत्यै । ॐ विशालत्यै । ॐ प्राणवाहिन्यै । ॐ सत्यै । ॐ सुमनायै । ॐ नंदा
यै । ॐ सुभद्रायै ।८॥ ततो दक्षिणोत्तराद्यता नवरत्नदेवताः पूजयेत् ॥ ॐ हिरण्यायै नमः । ॐ सुप्रभायै ।
ॐ लक्ष्म्यै न । ॐ विभूत्यै । ॐ विमलायै । ॐ प्रियायै । ॐ जयायै । ॐ ज्वालायै । ॐ विशोकायै ।९॥ ततः मध्ये
ॐ मंडूकाय नमः । कालाग्निरुद्राय । कूर्माय । वराहाय । अनंताय । पृथिव्यै । स्कंदाय । अंकुराय ।
नालाय । पद्माय । पत्रेभ्यो । केसरेभ्यो । कर्णिकायै । सिंहासनाय । धर्माय । ज्ञानाय । वैराग्याय । ऐ
श्वर्याय । अधर्माय । अज्ञानाय । अवैराग्याय । अनैश्वर्याय । सं सत्वाय । रं रजसे । तं तमसे । अग्नि
मंडलाय । सूर्यमंडलाय । सोममंडलाय । आत्मतत्वाय । कलातत्वाय । विद्यातत्वाय । शिवतत्वाय ।
आत्मने । अंतरात्मने । जीवात्मने । परमात्मने नमः ॥ इति गंधाक्षतैः संपूज्य ॥ ततः पद्मस्य पू
र्वादि क्रमेण । ॐ अणिमायै । महिमायै । लघिमायै । गरिमायै । प्राप्त्यै । प्राकाम्यै । ईशिता
यै । वशितायै । पद्ममध्ये ॐ सर्वसिद्ध्यै नमः ॥ ॐ सर्वज्ञानक्रियात्मने कमलासनाय योगपीठात्म

मंडलादीशानभागे कलशं प्रतिष्ठाप्य। तत्र वरुणमंत्रैर्वरुणं संपूज्य। ॐ गंगाद्याः सरितः सर्वाः समुद्राश्च सरांसि च आयांतु यजमानस्य दुरित
क्षयकारकः। अनेन मंत्रेण कलशे तीर्थान्यावाह्य पूजयेत्॥ ततो मंडूकादि पीठदेवताभ्यो नमः। इति संपूज्य॥ ततः वाह्यकोणेषु ॐ भूर्भुवः
स्वः गुरवः इहागच्छत इह तिष्ठत इतीशानकोणे गुरूनावाह्य। एवं गणेश दुर्गे क्षेत्रपाल इहागच्छ इह तिष्ठेति अवशिष्टकोणत्रये क्र
मेणावाहयेत्। तत्र प्रतिमायां अग्न्युत्तारणादि कृत्वा मध्ये स्थापयेत्॥ तत्रायं क्रमः॥ ॐ भूः वास्तुपुरुषमावाहयामि। ॐ भुवः वास्तुपुरु
षमावाहयामि। ॐ स्वः वास्तुपुरु०। ॐ भूर्भुवः स्वः वास्तुपुरुषमावाहयामि॥ वास्तोष्पत इति मंत्रस्य वशिष्ठ ऋषिः त्रिष्टुप् छंदः वा
स्तोष्पतिर्देवता वास्तोष्पत्यावाहने वि०॥ ॐ वास्तोष्पते।२। ॐ ह्रीं ॐ नमो भगवते वास्तुपुरुष महावल पराक्रम सर्वदेवाधिवासाधि
त शरीर ब्रह्मपुत्र सकल ब्रह्मांड धारिन् भूभाराधित मलकेपुर पत्तन प्रासाद गेहन वापी सरः कूपादि संन्निवेश सांन्निध्या
कर सर्वसिद्धिप्रद प्रसन्नवदन विश्वंभर परमपुरुष स्वरूपेच (?) श्रीशार्ङ्ग कर वरदाभय हस्त वास्तो नमस्तेन मस्ते॥ एह्येहि भग
वन् वास्तोयज्ञेऽस्मिन्सर्वसिद्धये। जानुनी कूर्परासक्ते दिशि वात हुताशयोः॥ इति मंत्रेण ईशाने शिरसने र्ऋत्य पादं आग्नेय
जानुनीके वायव्ये कूर्परं आकुंचित करं उत्तान वास्तुपुरुषं वास्तुमंडले आवाह्य॥ हे वास्तुपुरुष सांग सपरिवार सश
क्तिक सायुध सवाहन इहागच्छ इह तिष्ठ आवाह्य॥ ततः सर्वकोष्ठेषु ब्रह्मादि देवानावाहयेत्॥ तद्यथा॥ ॐ भूर्भुवः ब्रह्म
न् इहागच्छ इह तिष्ठेति मध्यकोष्ठे पद्मे ब्रह्माणमावाह्य॥ अर्घ्यमादीन् पि संवोधनांतं तत्तत्पद प्रहेपेणावाहयेत्। तद्य
था॥ ब्रह्मणः पूर्वपदद्वये अर्यमन् इत्यर्यमाणं।२। ततः दक्षिणपदद्वये विवस्वन् इहागच्छ इह तिष्ठ इति विवस्वंतं।३।
पश्चिमपदद्वये मित्र०।४। उदक्पदद्वये पृथ्वीधर०।५। तत आग्नेयपदार्धे त्वरे सावित्रे०।६। तद्दक्षिणे सवितः इहा॥

नैर्ऋत्यपदार्धयोः विबुधाधिप० ॥ ८ ॥ जय ॥ ९ ॥ वायव्यपदार्धयोः राजयक्ष्मन् ॥ १० ॥ रुद्र ११ ईशानपदार्धयोः आपः इहागच्छतं इह० ॥ १२ ॥
आपवत्स ॥ १३ ॥ ततः बहिः ईशानादि दक्षिणपदार्धमारभ्य क्रमेणेशानोत्तरपदार्धपर्यंतं नाह्वायेत् ॥ ॐ शिखिन् ॥ १४ ॥ पर्जन्य ॥ १५ ॥
जयंत ॥ १६ ॥ कुलिशायुध ॥ १७ ॥ सूर्य ॥ १८ ॥ सत्य १९ भृश २० आकाश २१ वायो० २२ पूषन् २३ वितथ २४ गृहक्षतके २५ यम २६ गंधर्व २७
भृंगराज २८ मृग २९ पितरः ३० दौवारिक ३१ सुग्रीव ३२ पुष्पदंत ३३ वरुण ३४ असुर ३५ शोष ३६ पाप ३७ रोग ३८
अहे ३९ मुख्य ४० भल्लाट ४१ सोम ४२ सर्प ४३ अदिति ४४ दिति ४५ इति प्रयोगे णमंडलमध्ये पंचचत्वारिंशद्देवतान्
वाह्येत् । ततो वाह्येशानकोणाद्वहिः चरकि इति चरकी १ आग्नेयकोणाद्वहिः विदारि० २ नैर्ऋत्यकोणाद्वहिः
पूतने इह० ३ वायव्यकोणाद्वहिः पापराक्षसि० ४ ॥ ततः बहिः प्राच्यां स्कंद १ दक्षिणे अर्यमन् २ पश्चिमे जृं
भक ३ । उत्तरे पिलिपिच्छ इह० ४ ततः प्राच्यादिक्रमेण० इंद्र इतीन्द्रं १ अग्ने २ यम० ३ निर्ऋते ४ । वरुण ५
वायो ६ सोम ७ ईशान ८ तत ईशानपूर्वयोर्मध्ये अनंत ॥ ९ ॥ नैर्ऋत्यवरुणयोर्मध्ये ब्रह्मन् इति ब्रह्माणं १० ॥
ततः प्राच्यां उग्रसेन १ दक्षिणे डामर २ पश्चिमे महाकाल । उत्तरे कुबेर इति कुबेरं ॥ ४ इत्यावाह्य मनो
ज्योति इति प्रतिष्ठाप्य ॥ १ ॥ ततः प्रणवादि नमोंतेन तत्तन्नाममंत्रेण पाद्यादिभि रुपचारैः क्रमेण
पूजनं ॥ तत्र पूजाकाले ध्यानं ॥ अक्षमालास्रुक् दंड कमंडलु धरः कमलासनो हे मां मध्वतुर्व

ॐ पद्मनयनोद्भवे दशाध्ययनशाली ब्रह्मा ध्येयः ॥१॥ ततश्चाल्कदेहत्र्यवस्थिताश्च सर्वे देवाधिश्चतुर्भुजाः कृतांजलिपुटा ऊर्ध्वं खड्ग
खेटकधरा ब्रह्माणं निरीक्षमाणाः ब्रह्ममुखाभिमुखा स्वस्वस्थानस्थिता ध्येयाः ॥ अष्टादशारे खाल्कनाडित्वेन तत्र देवतात्वे
न च ध्येयाः ॥ विशेषध्यानाभितु विस्तरत्वान्नोच्यते ॥ ततः पूजनं ॥ ॐ सर्वज्ञानक्रियाशक्तिकमलासनाय योगपीठा
य नमः ॥ इति पीठपूजनं ॥ ॐ नमो ब्रह्मणे इति प्रजापतिऋषिः पंक्तिछंदः ब्रह्मा देवता ब्रह्मपूजने वि० ॥ अथ षडं
गन्यासः ॥ यथा ॥ ॐ हृदयाय नमः । ॐ नं शिरसे स्वाहा । ॐ मो शिखायै वषट् । ॐ ब्रं कवचाय हुं । ॐ ह्मं नेत्रत्रयाय
वौषट् ॥ ॐ णें अस्त्राय फट् ॥ अथ पूजामंत्रप्रयोगः ॥ ॐ गुरुभ्यो नमः । ॐ गणेशाय नमः । ॐ दुर्गायै नमः । ॐ
क्षेत्रपालाय नमः० । ४ ॐ ब्रह्मणे नमः० १ ॐ अर्यम्णे नमः० २ ॐ विवस्वते ३ ॐ मित्राय ० ४ ॐ पृथ्वीधराय० ५ ॐ सावि
त्राय । ॐ सवित्रे ०७ । विबुधाधिपाय ०८ जयाय ९ राजयक्ष्मणे १० रुद्राय ११ अद्भ्यो नमः० १२ आपवत्साय १३ । शि
खिने । १४ । पर्जन्याय १५ जयंताय १६ कुलिशायुधाय १७ सूर्याय १८ सत्याय १९ भृशाय २० आकाशाय २१
वायवे २२ पूष्णे २३ वितथाय २४ गृहक्षतकाय २५ यमाय २६ गंधर्वाय २७ भृंगराजाय २८ मृगाय २९ पि
तृभ्यो ३० दौवारिकाय ३१ सुग्रीवाय ३२ पुष्पदंताय ३३ वरुणाय ३४ असुराय ३५ शोषाय ३६ पापाय ३७
रोगाय ० ३८ अहये ३९ मुख्याय ४० भल्लाटाय ४१ सोमाय ४२ सर्पाय ४३ अदित्यै ४४ दित्यै नमः ४५ ॥ च
रक्यै विदार्यै नमः० पूतनायै० पापराक्षस्यै ४ । स्कंदाय० अर्यम्णे० जंभकाय० पिलिपिच्छाय० ४ इंद्राय० ॥

३२

32

त्वापत्येन सर्वप्रवरेष्वाम्यौ ग्रौ: १४ हव्यानां त्रयः प्रवराः । आंगिरसोऽथ पार्षदश्व वैरूपेति २ अष्टादं १ पार्षदश्व वैरूपेति वा ३ । १ ब्रौ रथीतरे रविता
हः प्रवरसाम्यात् ३ त्र्यंगिरसं रसं शेतु यम स्वाईरसाति ना: अत्रेश्च शरो भेदाः । अथात्रयः प्रवरा गविष्ठिराः १ वाद्भुतकाः २ मुद्गलाश्चेति ३ तत्र श्यावा
श्वानां त्रयः प्रवराः । आत्रेय १ आर्चनानसं २ श्यावाश्वेति ३ गविष्ठिराणां त्रयः प्रवराः आत्रेय १ आर्चनानसं २ गाविष्ठिरेति ३ । आत्रेय १ गाविष्ठि
र २ पौर्वातिथेति वा ३ २५ वाद्भुतकानां त्रय. प्रवराः आत्रेयः १ आर्चनानसं २ वाद्भुतकेति ३ २६ मुद्गलानां त्रयः प्रवराः । आत्रेय । आर्चना
नसं २ पौर्वातिथेति ३ २७ । एषां चतुर्णां परस्परमविवाहः क्वचित् प्रतिथीनां त्रय. प्रवराः । आत्रेय आत्रेय १

अग्नये॰ यमाय॰ नैर्ऋतये॰ वरुणाय॰ वायवे॰ सोमाय॰ ईशानाय॰ अनंताय॰ ब्रह्मणे॰ ।२॰ उग्रसेनाय॰ डामराय॰ महाकालाय॰ कुबे
राय॰ एवमंत्रैः पाद्याद्युपचारैः पूजयेत् । ॐ वास्तुपुरुषाय नमः ॥ आवाहनं समर्पयामि ॥ ॐ वास्तु॰ आस॰ । ॐ वास्तु॰ पाद्यं॰
ॐ वास्तु॰ आच॰ अर्घ्यं॰ आच॰ पंचामृतस्नानं ॥ वस्त्रं॰ गंध॰ अक्षता॰ पुष्पाणि॰ धूपं॰ दीपं॰ नैवेद्यं॰ आचमन॰ फलं॰
तांबूलं॰ सुवर्णपुष्पं॰ ॥ ॐ वास्तोष्पते प्रतिजा॰ । इति पुष्पांजलिः ॥ ततो हस्ते गृहीत्वा भगवन् वास्तो सपरिवार इदं मयोपनी
तं बलिं गृहाण मम यजमानस्य ऋद्धिं कुरु सकुटुंबेभ्यो मार तरत्न स्वाहा ॥ अनेन मंत्रेण वास्तुमंडलसमीपे विशेषनैवेद्यव
लिं दद्यात् ॥ ॐ वास्तुपुरुषाय नमः । इति नमाय ॥ पुष्पाणि हस्ते गृहीत्वा ॥ यज्ञे भागं प्रतीक्ष स्व पूजां चैव बलिं मम ॥
नमो नमस्ते देवेश भवस्व स्तिकरो मम ॥ इत्युक्त्वा पुष्पांजलिं दद्यात् ॥ आवाहनं न जानामि ॥ एवं संपूजयेत् ॥ ॐ यद्ब्रा
ब्रह्मादि देवा इहागच्छंतु इह तिष्ठंतु इति ब्रह्मादिदेवानावाहयामि ॥ ॐ ब्रह्मादिदेवेभ्यो नमः । गंधाद्युपचारान् समर्पयामि ।
ततो होममध्ये होमानंतरं बलिदानं पूजनेतु आदावेव बलिदानं ॥ तद्यथा ॥ चंदनपुष्पधूपयाय सोदन लाजा सत्ता ।
तिलसक्तु माष भक्त बलिं गृहीत्वा मध्यपदचतुष्के हृदये ॥ ॐ ब्रह्मणे नमः बलिं समर्पयामि ॥१॥ एवं सर्वत्र ॥
पूर्वपदद्वये दक्षिणस्तने शर्करा पायसेन । अर्यम्णे नमः बलिं ॥२॥ दक्षिणपदद्वये दक्षिणस्तने रक्तचंदन
पायसेन विवस्वते नमः ॥ बलिं समर्पयामि ॥३॥ पश्चिमपदद्वये जठरे वामे । गुडापूपेन । मित्राय नमः । ब॰१
॥४॥ उदक्पदद्वये वामस्तने कूष्मांड मांसेन । पृथ्वीधराय नमः । ब॰॥५॥ आग्नेये पदार्धोत्तरे सावित्राय॰ ब॰
॥६॥ आग्नेय दक्षिणार्धे दक्षिणहस्ते सवित्रे॰ ब॰॥७॥ नैर्ऋत्य पदार्धयोः उपमेढ्रयोः विबुधाधिपाय॰
ब॰॥८॥ जयाय॰ ब॰ ४ वायव्य पदार्धयोः वामहस्ते राजयक्ष्मणे नं॰ ब॰१० रुद्राय॰ ब॰ ११ ईशान पदार्धयोः

मुखे आपो नमः ब॰ १२ आपवत्साय॰ ब॰ १३
ततः बहिर्दिशासु नपद दक्षिणपूर्वे [illegible]
[illegible] ब॰ ॥१४॥

३२

33

तद्दक्षिणसार्धपदे दक्षिणनेत्रे वर्जन्याय नमः व० २५ तद्दक्षिणपदद्वये दक्षिणश्रोत्रे जयन्ताय व० ॥२६॥ तद्दक्षिणपदद्वये
दक्षिणांसे कुक्षिशायुधाय व० २७ तद्दक्षिणपदद्वये दक्षिणबाहौ सूर्याय नमः व० १८ तद्दक्षिणपदद्वये दक्षिणप्रबाहौ
सत्याय व० १९ तद्दक्षिणसार्धपदे दक्षिणकूर्परे भृशाय व० २० तद्दक्षिणाग्नेयपदार्धे दक्षिणप्रबाहौ आकाशा
य व० २१ तत्पश्चिमार्धे दक्षिणप्रबाहवे वनावे व० २२ । तत्पश्चिमसार्धपदे दक्षिणमणिबन्धे पूष्णे नमः व० २३
तत्पश्चिमपदद्वये दक्षिणपार्श्वे वितथाय नः व० । २४ । तत्पश्चिमपदद्वये दक्षिणपार्श्वे स्वगृहरक्तकाय
व० २५ तत्पश्चिमपदद्वये दक्षिणोरौ यमाय व० २६ तत्पश्चिमपदद्वये दक्षिणजानौ गन्धर्वाय व० । २७ । तत्प
श्चिमसार्धपदे दक्षिणजंघायां भृंगराजाय व० २८ तत्पश्चिमनैर्ऋत्यपदार्धे दक्षिस्फिजि मृगाय व० २९
उत्तरार्धे पदयोः पितृभ्यो व० ३० तदुत्तरसार्धपदे वामस्फिजि दौवारिकाय व० ३१ तदुत्तरपदद्वये
वामजंघायां सुग्रीवाय व० ३२ तदुत्तरपदद्वये वामजानौ पुष्पदन्ताय व० ३३ तदुत्तरपदद्वये वामोरौ
वरुणाय व० ३४ तदुत्तरपदद्वये वामपार्श्वे असुराय व० ३५ तदुत्तरसार्धपदे वामपार्श्वे व शोषा
य व० ३६ तदुत्तरवायव्यपदार्धे वाममणिबन्धे पापाय व० ३७ तत्प्राक्पदार्धे वामप्रबाहौ रोगाय
व० ३८ तत्प्राक्सार्धपदे वामप्रबाहावेव अहेये व० ३९ तत्प्राक्पदद्वये वामकूर्परे मुख्याय व० ४०
तत्प्राक्पदद्वये वामबाहौ भल्लाटाय व० ४१ तत्प्राक्पदद्वये वामबाहावेव सोमाय व० ४२ तत्प्रा
क्पदद्वये वामांसे सर्पाय व० ४३ तत्प्राक्सार्धपदे वामश्रोत्रे अदित्यै व० ४४ तत्प्रागर्धपदे वाम

ॐ पिदार्यै० २ ॐ पूतनायै० ३ ॐ पापराक्षस्यै० ४ । ततः पूर्वस्यां ॐ स्कंदाय० व० १ दक्षिणे अर्यम्णे० व० २ पश्चिमे जंभका
य० व० ३ उत्तरे पिलिपिच्छाय० व० ४ ततः पुनः पूर्वाद्यष्टदिक्षु क्रमेण । इंद्राय० अग्नये० यमाय० निर्ऋतये० वरुणा
य० वायवे० सोमाय० ईशानाय० अनंताय० ब्रह्मणे० पुनः पूर्वस्यां । उग्रसेनाय० व० दक्षिणे डामराय० पश्चिमे
महाकालाय० ३ उत्तरे कुबेराय० ४ । ततः स्वर्गे पाताले मर्त्ये च ये देवा वास्तुसंभवाः ॥ ते गृह्णंतु इमं बलिं हृष्टाः
तुष्टा यांतु स्वमंदिरं ॥१॥ मातरो भूतवेताला ये चान्ये बलिकांक्षिणः । पिशाचाः पितृदायेच ते गृह्णंतु इमं बलिं २
इति मंत्राभ्यां सामान्यद्रव्य बलिदानं पूर्वस्यामेव ॥ उक्त तत्तद्द्रव्याभावे साज्य पायसेन सर्व एव बलिदानं ॥ ततो मंड
लात्पूर्वस्यां दिशि गोमयेनोपलिप्तायां भूमौ गंधादिदान पूर्वकं प्राक्संस्थं उदक्संस्थं वा सार्वभौतिक बलि
दानं ॥ तत्र मंत्रः ॥ ॐ भूतेभ्यो नमः गंधाद्युपचारान्समर्पयामि इति सर्वत्र । ततः बलिदानं । ॐ भूतेभ्यो नमः
बलिं स० १ पितृभ्यो० २ ॐ राक्षसेभ्यो० ३ ॐ पिशाचेभ्यो० ४ ॐ मातृभ्यो० ५ ॐ गणेभ्यो० ६ ॐ दिव्यभूतेभ्यो० ७
ॐ प्रेतक्षेत्रभूतेभ्यो० ८ ॐ भौमभूतेभ्यो० ९ इति प्रकारेण बलिदानं कृत्वा ॥ अमीवहा वास्तोष्पत इ
त्यादिभिर्मंत्रैः कांडानुसारेण पद्धत्यनुसारेण वा पूजयेत ॥ ॐ अमीवहा वास्तोष्पते १ ॐ स नो भुवन
स्य पते० २ इत्यादि मंत्रैः संपूज्य प्रार्थयेत ॥ सशैलसागरां पृथ्वीं यथा वहसि मूर्द्धनि । तथा मां व
ह कल्याण देहि मे यत्तजं सुखं ॥ वास्तोष्पते नमस्तेस्तु भूशय्याभिरत प्रभो । मद्गृहं धनधान्यादि
समृद्धिं कुरु सर्वदा ॥२॥ यथा मेरुगिरेः शृंगे देवानामालयः सदा । तथा ब्रह्मादि देवानां मम यज्ञे
स्थिरो भव ॥३॥ पूजितोसि मया वास्तो होमाद्यैरर्चनैः शुभैः । प्रसादं कुरु विश्वेश देहि मे सौख्य

यो तु देवगणाः सर्वे ॥२॥ अस्मिन्वास्तुपूजने येऽन्यूनातिरिक्तो यो विधिः सम्भवतां ब्राह्मणानां वचनात् श्रीवा
स्तुपुरुषप्रसादात् परिपूर्णमस्त्विति भवंतो ब्रुवंतु सर्वं परिपूर्णमस्तु ॥ यदा होमपक्षस्तदाभिन्ने स्थंडिले मंड
लदेवताभ्यः अष्टाविंशति अष्टौ वा उदुंबरादिसमिद्भिः तिलाज्यादिना तत्तन्नाममंत्रैः वास्तोष्पत इत्यादि चतु
र्भिर्वा वैदिकैर्मंत्रैर्होमः ॥ वास्तोष्पतये नम इति नाममंत्रेण पंच बिल्वफलानि तद्बीजानि वा जुहुयात् ॥
ततः स्विष्टकृदादि पूर्णाहुत्यंतं कृत्वा ॥ पवमानः सो अद्य नः । कृणुष्व पाज इति मंत्रैः मंडपं [illegible]
सर्वेभ्यः सकुटुंबयजमानं कलशोदकेनाभिषिंच्य उत्तरपूजां विधाय । ब्राह्मणभोजनसंकल्पं च कृत्वा चार्या
दिभ्यो दक्षिणां दत्वा यस्य स्मृत्येति क्षमापयेत् । एतावत्यशक्तौ बलिदानमंत्रं दद्यात् ॥ अत एव शार
दातिलके वायसेनैव बलिं हरेदित्युक्तं न होम इति सांप्रदायिकाः ॥ अस्मिन्पक्षे मंडलदेवतापूजनं
नव बलिदानं ॥ इति श्रीरुद्रपद्धतौ वास्तुपूजाप्रयोगः ॥ छ ॥ अथ मंडपस्तंभस्थितदेवतापूजनं ॥
तत्र पूजनप्रकारः ॥ यथा ॥ तत्र ईशानस्तंभे । एह्येहि विश्वेश पितामहेश हंसादिरूढ त्रि
दशैकवंद्य ॥ श्वेतोत्पलाभास कुशांबुहस्त गृहाण पूजां भगवन्नमस्ते ॥१॥ हंसपृष्ठसमारूढ
देवतागणपूजित । ईशकोणस्थितस्तंभ मंगलं कुरु जगत्पते ॥२॥ ॐ भूर्भुवः स्वः ब्रह्मन् इहागच्छ इह तिष्ठ ॥
ॐ ब्रह्मजज्ञानं ॥ ॐ ब्रह्मणे नम इति मंत्रेण गंधादिभिः पूजनं । इदमनुलेपनं । ॐ ब्रह्मणे० । इमानि पुष्पाणि ।
ॐ ब्र० । अयं धूपः । दीपः । इदं नैवेद्यं । इदं ताम्बूलं । वेदाधाराय वेदाय ज्ञानगम्याय हंसरथ । कमंडलु
धृतमालास्रुक्स्रुवहस्ताय ते नमः ॥ इति नमस्कारः ॥ कृष्णाजिनांबरधरः पद्मासनचतुर्भुज । जटाधर

जगद्धातः प्रसीद कमले द्व ॥ इति प्रार्थना ॥ ॐ स
श्रियै नमः ॥ ॐ वास्तुदेवतायै नमः । ॐ ब्राह्मणे० ॥
ॐ गंगायै० । इत्याद्यैर्गंधाद्युपचारान्समर्प्य० ॥

३८
34

श्री वा.
३८
३३

स्तंभमालभ्य॥ ऊर्ध्वऊर्ध्वबूस्रेष।इतिमंत्रजपः॥ स्तंभशिरसीश। ॐनागमात्रे नमः॥ ॐआयंगौरिति।
शिखाबंधनाद्यनुमंत्रणं॥ ॐयतोयतः समीहसे इतिमंत्रपाठः। एवंसर्वत्र॥२॥ ततः आग्नेयमध्य
मा= स्तंभे॥ आवाहयेत्तंगरुडोपरिस्थितं रसौघदेहं सुरराजवंदितं॥ कंसांतकं चक्रगदाब्जहस्तं भजा
मि देवं वसुदेवसूनुं॥१॥ पद्मनाभ हृषीकेश कंसचाणूरमर्दन॥ आगच्छ भगवन्विष्णो स्तंभे स्मि
न्सन्निधो भव॥२॥ ॐभूर्भुवः स्वः इहागच्छ॥ ॐइदं विष्णुः॥ इहतिष्ठ।ॐविष्णवेनमः।पू
जनं पंचोपचारैः। अयं गंध इत्यादिभिः॥ नमस्तेपुंडरीकाक्ष नमस्ते पुरुषोत्तम।नमस्ते सर्वलो
कात्मन् विष्णवेते नमोनमः। इतिनत्वा॥ देवदेव जगन्नाथ विष्णो यज्ञपते विभो। व्याधि
दुःखंबुधे रक्ष मां भक्तानुग्रहकारके॥ प्रार्थना॥ ॐलक्ष्म्यैनमः।ॐआदित्यनंदायै न०।ॐवै
ष्णव्यै नमः।पूजनं।ऊर्ध्वऊबुषः॥ आयंगौः॥ यतोयतः। इत्याग्नेयस्तंभपूजा॥ ततोनै
ऋत्यामस्तंभे॥ एह्येहि गौरीश पिनाकपाणे शशांकमौले वृषभाधिरूढ देवाधिदेवेश
महेश नित्यं गृहाण पूजां भगवन्नमस्ते॥१॥ गंगाधर महादेव पार्वतीप्राणवल्लभ।आगच्छ
भगवन्नीश स्तंभे स्मिन्सन्निधो भव॥२॥ ॐभूर्भुवः स्वः शंकर इहागच्छ।ॐनमो शंभ
वे०।इहतिष्ठ।ॐशंकराय नमः इति पंचोपचारैः पूजनं॥ वृषवाहाय देवाय पार्वतीपतये

नमः। वरदायार्द्धकायाय नमश्चंद्रार्धमौलिने॥ पंचवक्त्र वृषारूढ त्रिलोचन सदाशिव॥
चंद्रमौले महादेव मम स्वस्तिकरो भव॥२॥ व=

३५
35

ॐ गौर्यै नमः ॥ ॐ माहेश्वर्यै नमः ॥ ॐ शोभनायै नमः ॥ पूजनं ॥ ऊर्ध्वं कुंभं ॥ आयं गौः । यतो यतः ॥ इति
नैर्ऋत्ये ॥३॥ ततो वायव्यस्तंभे ॥ एह्येहि वज्रपद्म गजाधिरूढ सहस्रनेत्र त्रिदशैकराज ॥ शचीपते
शक्र सुरेश शक्ति ... गृहाण पूजां भगवन्नमस्ते ॥१॥ शचीपते महाबाहो सर्वाभरणभूषित ॥ आगच्छ
भगवन्नीश स्तंभेऽस्मिन्संनिधिं कुरु ॥ ॐ भूर्भुवः स्वः इंद्र इहागच्छ ॥ ॐ त्रातारमिंद्र ॥ इह तिष्ठ ॥
ॐ इंद्राय नमः । इति पूजनं ॥ पुरंदर नमस्तेऽस्तु वज्रहस्त नमोऽस्तु ते । शचीसुत नमस्तेऽस्तु नमस्ते
मेघवाहन ॥ नमस्कारः ॥ देवराज गजारूढ पुरंदर शतक्रतो ॥ वज्रहस्त महाबाहो वांछिता
र्थप्रदो भव ॥ प्रार्थना ॥ इति वायव्यस्तंभपूजा ॥ पुनः बाह्ये ईशानकोण द्वारस्य द्वादश स्तं
भान् पूजयेत् ॥ तद्यथा ॥ आवाहयेत्तं द्विभुजं दिनेशं सप्ताश्ववाहं द्युमणिं महेशं ॥ सिं
दूरवर्णं प्रतिभावभासं भजामि सूर्यं कुलवृद्धिहेतोः ॥१॥ पद्महस्त महाबाहो सप्ताश्व
ताश्ववाहनं । आगच्छ भगवन् भानो स्तंभेऽस्मिन्संनिधो भव ॥२॥ ॐ भूर्भुवः स्वः सूर्य इहा
गच्छ ॥ ॐ आकृष्णेन ॥ इह तिष्ठ ॥ ॐ सूर्याय नमः ॥ इति पंचोपचारैः पूजनं ॥ नमः सवि
त्रे जगदेकचक्षुषे जगत्प्रसूतिस्थितिनाशहेतवे । त्रयीमयाय त्रिगुणात्मधारिणे
विरंचिनारायणशंकरात्मने ॥ नमस्कारः ॥ पद्महस्त रथारूढ पद्मासन सुमंग
ल । तमोंऽकुर हृदयालोक त्वं ग्रहराज नमोऽस्तु ते ॥ इति प्रार्थना ॥ ॐ सौर्यै नमः ॥ ॐ भूत्यै नमः

आवाहयेत्तं गणराजदेवं रक्तोत्पलाभासमशेषवंद्यं । विघ्नांतकं विघ्नहरं गणेशं भजामि देरौद्रं सहितं च
सिद्ध्या ॥ लंबोदर महाकाय गजवक्त्र चतुर्भुज । आगच्छ गणराज त्वं स्तंभेस्मिन्सन्निधो भव ॥ ओं भूर्भु
वः स्वः गणपते इहागच्छ । ओं गणानां त्वा० इह तिष्ठ । ओं गणपतये नमः ॥ इति पूजनं ॥ नमस्ते ब्रह्म
रूपाय विष्णुरूपाय ते नमः ॥ नमस्ते रुद्ररूपाय करिरूपाय ते नमः ॥ नमस्कारः ॥ लंबोदर महाकाय
सततं मोदकप्रिय । गौरीसुत गणेशात्व विघ्नराज वसीदमे ॥ इति प्रार्थना ॥ ओं सरस्वत्यै नमः ॥ ओं वि
घ्नहारिण्यै नमः ॥ ओं जयायै नमः । पूजनं । ऊर्ध्व ऊं पुण्यं ॥ आयंगौः ॥ यतो यतः ॥ २ ॥ पूर्वाग्नेयो
रंतराल स्तंभे ॥ एह्येहि दंडायुध धर्मराज कालांजनाभास विशालनेत्र । विशालवक्षःस्थल रुद्ररूप
गृहाण पूजां भगवन्नमस्ते ॥१॥ चित्रगुप्तादिसंयुक्त दंडमुद्गरधारक । आगच्छ भगवन्धर्म स्तंभे
स्मिन्सन्निधो भव ॥२॥ ओं भूर्भुवः स्वः यम इहागच्छ । ओं यमाय त्वा० । इह तिष्ठ ॥ ओं यमाय नमः ॥
इति पूजनं ॥ ईवत्वान नमस्तेस्तु दंडहस्त नमोस्तु ते । महिषस्थ नमस्तेस्तु धर्मराज नमोस्तु ते ॥
नमस्कारः ॥ धर्मराज महाकाय दक्षिणाधिपते मम । रक्तेक्षण महाबाहो मम पीडां निवारय ॥
प्रार्थना ॥ ओं धूम्रवर्णायै नमः ॥ ओं खंजन्यै नमः ॥ ओं क्रूरायै नमः ॥ ओं निर्ऋत्यै नमः ॥ पूजनं ॥ ऊ
र्ध्व ऊं पुण्यं ॥ आयंगौः ॥ यतो यतः ॥ ३ ॥ वाय्वाग्नेयकोण स्तंभे ॥ एह्येहि नागेंद्रधरा

धरेश कीर्तिमते ऊं भवनवकवचं । नागाधि
प सर्वगणसार्व पूजां भगवन्नमस्ते ॥४॥

आश्री विषसमोपेतं नागकन्याविराजितं । आगच्छ नागराजेंद्र त्वं मे क्षिप्रं सन्निधो भव ॥ ॐ भूर्भुवः स्वः
नागराज इहागच्छ ॥ ॐ आयंगौः । इह तिष्ठ । ॐ नागराजाय नमः ॥ इति पूजनं ॥ नमः खेटकहस्तेभ्य
स्त्रिभ्यो गेभ्यो नमो नमः ॥ नमो भीषणदेवेभ्यः खड्गधृग्भ्यो नमो नमः ॥ खड्गखेटकधाराः सर्पाः
मैकलमंडलमंडिताः । एकभोगाः साहस्रशः । वरदाः सन्तु मे सदा ॥ इति प्रार्थना ॥ ॐ मध्यमसं
ध्यायै नमः ॥ ॐ धरायै नमः । ॐ वज्रायै नमः । ॐ महावज्रायै नमः । ऊर्ध्वऊबुणः ॥ आयंगौः ।
यतोयतः ॥४॥ आग्नेयदक्षिणयोरंतराले स्तंभे ॥ आवाहयामि देवेशं षण्मुखं कृत्तिकासुतं ॥
रुद्रतेजसमुत्पन्नं देवसेनासमन्वितं ॥ मयूरवाहनं शक्तिपाणिं वै ब्रह्मचारिणं । आगच्छ भगव
न्स्कंद त्वं मे क्षिप्रं सन्निधो भव ॥ ॐ भूर्भुवः स्वः स्कंद इहागच्छ । ॐ यदक्रंदः ॥ इह तिष्ठ ॥
ॐ स्कंदाय नमः इति पूजनं ॥ ॐ नमः स्कंदाय शैवाय घंटाकुक्कुटधारिणे । पताकाशक्तिह
स्ताय षण्मुखाय नमो नमः ॥ इति नमस्कारः ॥ मयूरवाहन स्कंद गौरितात षडानन । का
र्त्तिकेय महाबाहो दयां कुरु दयानिधे ॥ इति प्रार्थना ॥ ॐ पश्चिमसंध्यायै नमः ॥ जयायै नमः ॥
शक्त्यै नमः ॥ ऊर्ध्वऊबुणः ॥ आयंगौः ॥ यतोयतः ॥ ५ ॥ दक्षिणनैर्ऋत्यां तराले स्तंभे ॥
आवाहयामि देवेशं भूतानां देहधारिणं । सर्वाधारं महावेगं मृगवाहनमीश्वरं ॥ ध्वज

हंत्रैलोक्यचारिणं ॥ आ
गच्छ भगवन्वायो त्वं मे क्षिप्रं सन्निधो भव ॥

ॐ भूर्भुवः स्वः वायो इहागच्छ ॥ ॐ तव वायवृत स्पते । इह तिष्ठ ॥ ॐ वायवे नम इति पूजनं ॥ नमोध्वज धारिणे(?) ... र शिवदक्षस्य समीरण नमोऽस्तु ते ॥ धूम्रवर्ण नमस्तेऽस्तु शीघ्रगामी नमोऽस्तु ते ॥ धावन्नु धरणि दक्ष स्य ध्वजहस्त समीरण । दंडसंहस्तमारूढं वरं देहि वरप्रद ॥ इति प्रार्थना ॥ ॐ वायव्यै नमः । ॐ गायत्र्यै नमः ॥ ॐ मध्यमसंध्यायै नमः ॥ ऊर्ध्व ऊरुगुणः ॥ आयं गौः । यतो यतः ॥ ६ ॥ नैरृत्यसंभे ॥ आवाहयामि देवेशं शशांकं रजनीपतिं । क्षीरोदधिसमुद्भूतं हरमौलिविभूषणं ॥ सुधाकर द्विजाधीशं त्रैलोक्य प्रीतिकारकं ॥ ॐ वध्याप्यायनकरं सोमं केन्दर्पवर्धनं ॥ आगच्छ भगवन्सोम स्तंभेऽस्मिन्सन्निधो भव ॥ ॐ भूर्भुवः स्वः सोम इहागच्छ ॥ ॐ आप्यायस्व । इह तिष्ठ ॥ ॐ सोमाय नमः । इति पू० ॥ अत्रिपुत्र नमस्तेऽस्तु नमस्ते शशलांछने । श्वेतांबर नमस्तेऽस्तु ताराधिप नमोऽस्तु ते । इति नमस्कारः ॥ अत्रिपुत्र निशानाथ द्विजराज सुधाकर ॥ सोम त्वं सौम्यभावेन ग्रहपीडां निराकुरु ॥ इति प्रार्थना ॥ ॐ सावित्र्यै नमः ॥ ॐ अमृतकलायै नमः । ॐ विजयायै नमः ॥ ॐ पश्चिमसंध्यायै । इति पूजा ॥ ऊर्ध्व० आयं० । यतो० ॥ ७ ॥ नैरृत्यपश्चिमयोर्मध्यस्तंभे ॥ आवाहयामि देवेशं सलिलस्याधिपं प्रभुं । पाशपाशधरं सौम्यं वरुणं यादसांपतिं ॥ १ ॥ कुंभीरथसमारूढं मणिरत्नसमन्वितं । आगच्छ देव वरुण स्तंभेऽस्मिन्सन्निधो भव ॥ २ ॥ ॐ भूर्भुवः स्वः वरुण इहागच्छ ॥ ॐ इमं मे वरुण । इह तिष्ठ ॥ ॐ वरुणाय नमः इति पूजनं ॥ वरुणाय नमस्तेऽस्तु

नमः स्फटिकदीप्ताये । नमस्ते श्वेतहाराय जलेशायिने नमो नमः ॥ इति नमस्कारः ॥

शंखस्फटिकवर्णाभ श्वेतहाराम्बरावृत ॥ पाशहस्त महाबाहो दयां कुरु दयानिधे ॥ इति प्रार्थना ॥ ओं वारुणायै नमः ॥
मा शूर्वधारिण्यै०॥ वाहिस्वत्यै० ऊर्ध्व० ।आर्य०यतो०।२। पश्चिमवायव्यं तराल संमे ॥ आवाहयाम्यदेवेशा
न्वसून्यष्टौ महाबलान् ।सौम्यमूर्तिधरान्देवान्दिव्यायुधकरान्वितान् ॥ शुद्धस्फटिकसंकाशान्नाना
नानावस्त्रविराजितान् ॥ अश्वारूढान्दिव्यवस्त्रान्सर्वालंकारभूषितान् ।आवाहयामि संमे स्मि
न्वसून्यष्टौ सुखावहान् ॥ ओं भूर्भुवः स्वः वसवः इहागच्छत । ओं वसत्वा० इह तिष्ठत । ओं
वसुभ्यो नमः इति पूजनं ॥ नमस्करोम्यदेवेशान् नानावस्त्रविराजितान् ।शुद्धस्फटिकसंकाशान्दि
व्यायुधकरान्वसून् ।नमस्कारः ॥ दिव्यवस्त्रा दिव्यदेहाः पुष्पमालाविभूषिताः ॥ वसवोष्टौ महा
भागा वरदाः सन्तु मे सदा ॥ इति प्रार्थना ॥ ओं विनतायै नमः ।ओं अणिमायै०। विभूत्यै०। गरिमायै०
।ऊर्ध्व० ।आर्य०।यतो०।२॥ वायव्य संमे ॥ आवाहयाम्यदेवेशं धनदं यक्षपूजितं ।महाबलं दिव्य
देहं नरयानगं विभुं ॥ आगच्छ यक्षराज त्वं यज्ञेस्मिन्सन्निधो भव ॥ ओं भूर्भुवः स्वः धनद इहाग
च्छ ॥ ओं सोमो धनुं० इह तिष्ठ० । ओं धनदाय नमः इति पू० ॥ यक्षराज नमस्तेस्तु नमस्ते नरयानग ॥
पीताम्बर नमस्तेस्तु गदापाणे नमोस्तु ते ।नमस्कारः ॥ दिव्यदेह धनाध्यक्ष पीताम्बर गदाधर । उत्त
रेश महाबाहो वांछितार्थफलप्रद ॥ प्रार्थना ॥ ओं आदित्यै० ।ओं लघिम्ने नमः ।ओं क्षिप्रवाल्यै न

ॐ सुहोत्रतारणाय नमः ॥ पूर्ववत् चंदनादि चर्चितं कृत्वा ॥ सोमकेतु शनी लग्नन्यसेत् पूजयेत् ॥ ॐ सोमाय नमः ॥ शनैश्चराय नमः । ॐ केतुभ्यो० ॥ इति पूजनं ॥ पूर्ववत् कलशस्थापनं । तत्र विघ्नेशमावाहयेत् पूजयेत् ॥ ॐ विघ्नेशाय नमः ॥ पू० ॥ इति तोरणपूजा ॥ ततः पूर्वद्वारे कलशद्वयं चंदनोदक फल पंचमृत्तिका पंचपल्लव सर्वौषधी । सुवर्ण पंचरत्नादियुतं दध्यक्षत धिमूषितं वस्त्र पुष्पमाला चंदनचर्चितं रक्तसूत्र वेष्टितान नं पूर्ववन्मंत्रैः स्थापयेत् ॥ प्रतिकलशं मंत्रावृत्तिः ॥ ऐरावतं कलशद्वये न्यसेत् पूजयेत् ॥ ॐ ऐरावताय नमः । इति पूजनं ॥ ॐ द्वारश्रीयै नमः ॥ ऊर्ध्वं । अधः । ॐ देहल्यै नमः । वामदक्षिण स्तंभयोः ॥ ॐ गणेशाय नमः ॥ ॐ स्कंदाय नमः ॥ पूजनं द्वारस्थितकलशद्वये ॥ ॐ गंगायै नमः ॐ यमुनायै० ॥ पूजनं स्थापनं च ॥ तत्र ऋग्वेदिनाऋत्विजो पूर्वद्वारे शांतिसूक्तं जपार्थं त्विनत्वाम हं वृणे ॥ वृतोस्मीति प्रत्युत्तरं ॥ ततः ऋग्वेदपद्मपत्राक्षो गायत्री सोमदेवताः ॥ अत्रिगोत्रस्त्वं विप्रेंद्र ऋत्विक् त्वं मे मखे भवेति प्रत्येकं दत्वा ॥ ॐ अग्निमीले पुरोहितमित्यादिमंत्रेण प्रत्येकं गंधादिभिरुपचारैः पूजयेत् ॥ ततः एह्येहि सर्वामराभिवृद्धसाध्यैरभीष्टुतो वज्रधरामरेशः । संवीज्यमानोप्सरसां गणेन रक्षाध्वरं नो भगवन्नमस्ते ॥ ओं इंद्र इहागच्छ इह तिष्ठेति सांग सपरिवारं सायुधं शक्तिकं द्वारदेशे कलशे आवाह्य ॥ ॐ त्रातारमिंद्रं ॥ अनेनार्घ्यं दत्वा ॥ अनेन मंत्रेण इंद्रपूज

३८

३१

ओषधयः सम्मिति । यवान् क्षिप्त्वा ॥ आजिघ्रं कलशमिति कलशं स्थापयेवइत्वा ॥ वरुणस्योत्तम्भनमि
ति जलेनापूर्य । गंधद्वारामिति गंधं । या ओषधी इति सर्वौषधीः ॥ ओषधयः सम्मियवान् ॥ कांडा
त्कांडा दिति दूर्वा । ॐ अश्वत्थेव इति पंच पल्लवान् ॥ स्योना पृथिवीति पंचसप्तमृदः । याः फलिनी
रिति फलं ॥ परिवाजपति रिति पंच रत्नानि ॥ हिरण्यगर्भ इति हिरण्यं । युवा सुवासा इति रक्तव

त्यु= स्त्रेण रक्तसूत्रेण चवेष्टयेत् ॥ पूर्णादर्वीति कलशोपरि धान्यपूर्णपात्रं न्यसेत् । तं कलशं दध्यक्षतैर्विभू
षितं कुर्यात् ॥ तस्मिन् कलशे ध्रुवावाहनं ॥ ॐ ध्रुवाय नमः इति पूजनं ॥ ततो दक्षिणे ॥ औदु
वरं लाक्षं वा । सुभद्रं विकटं वा ॥ त्रिशूलचिह्नितं तोरणं । ॐ इषे त्वेति निधाय ॥ ॐ विकटतो
रणाय नमः ॥ इति नाममंत्रेण पूजनं । चंदनादि रचर्चितं कृत्वा ॥ सूर्याङ्गारकौ न्यसेत् पूज
येत् ॥ ॐ सूर्याय० गंधाद्युपचारान् स० ॥ ॐ अंगारकाय० गं० । ततः पूर्ववत्कलशस्थापनं ॥ तत्र
धरामावाहयेत् पूजयेत् ॥ ॐ धरायै नमः ॥ गं० ॥ ततः पश्चिमे लाक्षं औदुंवरं वा ॥ सुकर्म सुभी
मं वा । त्रिशूलचिह्नितं तोरणं ॥ अग्न आयाहीति निधाय नाम्ना पूर्ववत्तं पूज्य ॥ चंदनादि
ना चर्चितं कृत्वा शुक्रबुधं च तत्र न्यस्य पूजयेच्च ॥ ॐ शुक्राय० ॐ बुधाय नमः ॥ पूजनं । त
त्र पूर्ववत्कलशस्थापनं ॥ तत्र वाक्पतिमावाहयेत् पूजयेत् ॥ ॐ वाक्पतये नमः । गंधाद्युप० ।

ततः उत्तरे वा दं ग्राम्यस्त्वं वा लाक्षं वा सुहोत्रं
सुप्रभं वा ॥ त्रिशूलांकितं तोरणं ॥ ज्ञानो देवी
इति निधाय ॥ नाम्ना पूर्ववत्तं पूज्य ॥ ॥

ॐ हुहोत्रतारणायनमः ॥ पूर्ववत् चंदनादि चर्चितं कृत्वा ॥ सोमकेतु शनी लत्रन्यसेत् पूजयेत् ॥ ॐ सोमायनमः
॥ शनैश्चरायनमः । ॐ केतुभ्यो० ॥ इतिपूजनं ॥ पूर्ववत्कलशस्थापनं । तत्र विघ्नेशमावाहयेत् पूजयेत् ॥
ॐ विघ्नेशायनमः ॥ पू० ॥ इतितोरणपूजा ॥ ततपूर्वद्वारे कलशद्वयं चंदनोदकफल पंचमृत्तिका पंचप
ल्लव सर्वौषधी । सुवर्ण पंचरत्नादियुतं दध्यक्षत धिभूषितं वस्त्रपुष्पमाला चंदनचर्चितं रक्तसूत्र वेष्टि
तान्नं पूर्ववन्मंत्रैः स्थापयेत् ॥ प्रतिकलशं मंत्रावृत्तिः ॥ ऐरावतं कलशद्वयेन्यसेत् पूजयेत् ॥ ॐ ऐरावताय
नमः । इतिपूजनं ॥ ॐ दारश्रीयैनमः ॥ ऊर्ध्वं । अधः । ॐ देहल्यैनमः । वामदक्षिण स्तंभयोः ॥ ॐ गणे
शायनमः ॥ ॐ स्कंदायनमः ॥ पूजनं द्वारस्थितकलशद्वये ॥ ॐ गंगायैनमः ॐ यमुनायै० ॥ पूज
नं स्थापनं च ॥ तत्रे ऋग्वेदिना ऋत्विजो पूर्वद्वारे शांतिसूक्तं जपार्थं त्विन त्वामहं वृणे ॥ वृतोस्मी
ति प्रत्युत्तरं ॥ ततऋग्वेद पद्म पत्राद्रा गायत्रि सोमदेवता ॥ अग्निमीळे पुरोहितं विश्वेदेवा ऋत्विक्त्वं मे
म भव भवति प्रत्येकं दत्वा ॥ ॐ अग्निमीळे पुरोहितमित्यादि मंत्रेण प्रत्येकं गंधादिभिरुपचारैः
पूजयेत् ॥ ततः एह्येहि सर्वामराभिपूज्य साध्यैरभीष्टो वज्रधरामरेशः । संवीज्यमानो प्सर
सांगणेन रक्षाध्वरं नो भगवन्नमस्ते ॥ १ ॥ यो इंद्र इहागच्छ इहतिष्ठ इति सांगं सपरिवारं सायुध
वशक्तिकं द्वारपूर्वेकलशे आवाह्य ॥ ॐ त्रातारमिंद्रं ॥ अनेनार्घ्यं दत्वा ॥ अनेनमंत्रेण इंद्रं पूज

३५

ततः आप्तुः क्षिप्रान इति मंत्रेण पीतां पताकां पीतं ध्वजं च इंद्रप्रीतये दद्यमध्ये च हस्तदंड उत्क्षिपेत् ॥
ॐ वज्राय० पताकाय० ॥ आवाह्य पूजयेत् ॥ ध्वजे ॥ ॐ कुमुदाय नमः ॥ ततः सहस्राक्षं मत्तैरावण
स्थितं पीतं किरीटकुंडलधरं दक्षिणवामकरस्थवज्रोत्पलं इंद्रं ध्यात्वा ॥ इंद्रः सुरपतिः श्रेष्ठो वज्र
हस्तो महाबलः । शतयज्ञाधिपो देवस्तस्मै नित्यं नमो नमः ॥ इति नत्वा इंद्राय सांगाय सपरिवा
राय सशक्तिकाय एतं माषभक्तबलिं समर्पयामीति बलिं समर्पयेत् ॥१॥ ततः आचम्य ॥ आ
ग्नेये गत्वा पूर्ववत्कलशं स्थापयित्वा ॥ पुंडरीकं तत्र पूजयित्वा अग्न्यंते च तत्र पूजयित्वा अनं
तरं छागस्थं रक्तदक्षिणवामकरद्वय धृतशक्तिकमंडलुं यज्ञोपवीतिनं अग्निं ध्यात्वा ॥
एह्येहि सर्वामरहव्यवाह मुनिप्रवर्यैरभितोभिजुष्ट तेजोवता लोकगणेन सार्धं ममाध्व
रं पाहि कवे नमस्ते ॥ भोऽग्ने इहागच्छेह तिष्ठेति सांगं सपरिवारं सायुधं सशक्तिकं अग्निं कल
शे आवाह्य ॥ रक्तां पताकां रक्तं ध्वजं च हस्तदंड । ॐ अग्निं दूतमित्युत्क्षिपेत् । ॐ शक्त्ये नम इति प
ताकायां । ॐ कुमुदाय नम इति ध्वजे ॥ ततः त्वन्नो अग्ने इति मंत्रेण अग्निं गंधादिभिः पूजयेत् ॥ आ
ग्नेयः पुरुषो रक्तः सर्वदेवमयोऽव्ययः धूम्रकेतु रजोध्यक्षः तस्मै नित्यं नमो नमः ॥ इति
नत्वा सांगाये त्याद्युक्त्वा ॥ अग्नये एतं माषभक्तबलिं समर्पयामीति बलिं समर्पयेत् ॥

ॐ कपर्दिने० ॥ द्वारस्थितकलशाद्ये ॐ गोदायै० ॥ ॐ कृष्णायै० ॥ ततो यजुर्वेदिनाऽऽर्त्विजो दक्षिणद्वारे शां
तिसूक्तजपार्थं त्वेन त्वामहं वृणे ॥ वृतोऽस्मीति । कातरात्रेय यजुर्वेद हे शुभो विष्णुदेवतः । काश्यपेय लक्ष
विधेंद्र ऋत्विक् त्वं मे भवेति प्रत्येकं दत्वा इषे त्वोर्जे त्वेति गंधादिभिरुपचारैः पूजयेत् ॥ ततो महि
षारूढं धृतदंडपाशं दक्षिणवामकरद्वयं कृष्णांजनं च यो यमं त्रस्तसमलोचनं यमं ध्यात्वा एह्येहि
वैवस्वत धर्मराज सर्वामरैरर्चित धर्ममूर्ते ॥ शुभाशुभानंद शुचामधीश शिवाय नम पाहि मखं त्वंन
मस्ते ॥ १ ॥ ओं यम इहागच्छेह तिष्ठेति सांगादि विशिष्टं यममावाह्य कृष्णां पताकां कृष्णां ध्वजं चं
आयं गौरिति मंत्रेण उच्छ्रयेत् ॥ ॐ दंडायन० पताकायां । पुंडरीकाय० ध्वजे । ततो यमाय त्वेति मं
त्रेण यमं गंधादिभिः पूजयित्वा ॥ महामहिषमारूढं दंडहस्तं महाबलं । आवाहये दयाभियज्ञेऽस्मि
न् पूजेयं प्रतिगृह्यतामिति नत्वा ॥ सांगाय सायुधाय(?) यमायेतं माषभक्तबलिं समर्पयामि इति बलिं
समर्पयेत् ॥ ततः आचम्य ॥ नैर्ऋत्यां गत्वा पूर्ववत्कलशं स्थाप्य ॥ कुमुदं दुर्जयं च पूजयित्वा ततो
नरारूढं महाकायं खड्गहस्तं महाबलं । नीलवज्रराक्षसवेष्टितं पीताभरणभूषितं निर्ऋतिं ध्यात्वा ॥
एह्येहि रक्षोगणनायक त्वं विशालवेतालपिशाचसंघैः । ममाध्वरं पाहि पिशाचनाथ लोकेश्वर(?) त्वं
भगवन्नमस्ते ॥ ओं निर्ऋते इहागच्छेह तिष्ठेति सांगादिमावाह्य । नीलां पताकां नीलं ध्वजं च
मोषूण इति मंत्रेणोच्छ्रित्य ॥ ॐ खड्गाय नमः पताकायां । ध्वजे वामनाय नमः पू० ॥ अत्र सुन्वंतमिति

४०

नंदिने नमः ॥ चंडायनमः ॥ कलशस्ययेरेवायेनमः ॥ ताय्येनमः ॥ ततः सामवेदारत्विजो वश्चिंद्वारे शां
ति सूक्तजपार्थं वेन त्कीत्वा महुवरणं । वक्रो० ॥ सामवेदस्क पिंगाक्तो जागतः शक्र देवंतः ॥
मम द्वारे रक्ष विद्वेंद्र । ऋत्विकुत्वं मम खे भवेति प्रत्येकं चत्वा । अग्नग्रायाहीति गंधाद्यु
पचारैः पूजयेत् ॥ ततो मकरस्थपाशहस्तं शुक्लवर्णं किरीटधारिणं वरुणं ध्या
त्वा ॥ एह्येहि यादोगणवारिधीनां गणेन पर्जन्यसहाप्सरोभिः ॥ विद्याधरेंद्रामर
गीयमान पाहित्वमस्मान् भगवन्नमस्ते ॥ मोवरुणो हाग च्छेह तिष्ठेति सांगादि विशि
ष्टं वरुणमावाह्य ॥ श्वेतां पताकां श्वेतं ध्वजं च इमं मे वरुण त्युक्तं कुर्यात् ॥ ओं पा
शायनमः ॥ इति पताकां ॥ ओं शं कुकुर्णीयनमः । ध्वजे ॥ तत्त्वायामीति मंत्रेण कुर्ये
त् ॥ ओं वरुणायनमः । इति पूजयित्वा ॥ पाशहस्तं च वरुणं मर्णसां पतिमीश्वरं ।
आवाहयामि यज्ञेस्मिन् वरुणायनमोनमः इति नत्वा ॥ सांगायेत्यायुक्त्वा ॥ वरुणा
यैतं माषभक्त बलिं स० ॥ ततः आचम्य ॥ वायव्यांपूर्ववत्कलशं निधाय । ततः पु
ष्पाक्षतं सिद्धार्थं च संपूज्य ॥ मृगाधिरूढं धूम्रवर्णं चित्रांबरधरं युवानं वरध्वज

शि॰ क॰
४

मोवायोइहागच्छेह तिष्ठेति सांगादि विशिष्टं वायुमावाह्य ॥ धूम्रां पताकां धूम्रं च ध्वजं वायो पते
ति मंत्रेण न्यसेत् ॥ ॐ ध्वजाय नमः ॥ पताकायां ॥ ॐ सर्वनेत्राय० ध्वजे ॥ तव वाय इति मं
त्रेण वायवे नमः । इति नमः । इति वा । वायुं गंधादिभिरभ्यर्च्य ॥ वायुमाकाशगं चैव पवनं
वेगवाहिनं ॥ आवाहयाम्यहं यज्ञे स्मिन् पूजयं प्रतिगृह्यतां ॥ अनाकारो महोजाश्च यश्चादृष्ट
गतिर्दिवि ॥ तस्मै पूज्याय जगतां वायवे हं नमाम्यहं इति नत्वा ॥ सांगायेत्याद्युक्त्वा ॥ एतं माष
भक्तबलिं सं० तत: आचम्योत्तरे ॥ कलशद्वयं प्रतिद्वारं प्राग्वत् स्थापयित्वा ॥ तत्र सार्वभौम
दिग्गजं न्यस्य पूजयेत् । सार्वभौमाय० गं ध० ॐ द्वारश्रियै० । ऊर्ध्व० । देहल्यै नमः अध:
॥ स्तंभयो: महाकालाय० ॐ भ्रभिलोनमः ॥ द्वारकलशद्वये ॥ वातायेनमः । वेतायेनमः ॥
॥ अथ अथर्ववेदाचार्योजो उत्तरद्वारे शांतिसूक्तजपार्थं विनत्वा महं वृणे ॥ दे० । व
हत्वेत्रो ऽथर्ववेदोनुष्टुभो रुद्रं देवत: । वैपायन विप्रेंद्र त्वं ऋत्विक् त्वं मेमखे भवेति प्रत्ये
कं वृत्वा ॥ ॐ शन्नो देवी रिति गंधादिभिः संपू० ॥ ततो नरयुक्तं विमानस्थं कुंडल ।
हारकेयूररुचिरं वरदाभय दक्षिण वामभुजद्वयं कुमुकुटिनं महोदरं महाकायं

स्वे=२

सर्वौषधीभिः पितृभिः सहेव गृहाण पूजां भगवन्नमस्ते ॥ ओं सोम इहागच्छ इह तिष्ठेति सांगादि वि-
शिष्टं सोममावाह्य ॥ हरितां पताकां हरितं ध्वजं च आप्यायस्वेति न्यस्य ॥ ओं गदायै नमः ॥ प-
ताकायां ॥ ओं सुमुखाय नमः । ध्वजे । ओं सोमो धेनुमिति मंत्रेण वौषट् ॰ सोमं त्वा । सोमाय नम
इति सोमं पूजयित्वा ॥ सर्वनक्षत्रमध्येषु सोमो राजा व्यवस्थितः । तस्मै सोमाय देवाय नक्षत्र-
पतये नमः ॥ इति नत्वा ॥ सोमायेत्याद्युक्त्वा ॥ सोमायैतं माषभक्तबलिं स० ॥ ततः आचम्य ॥
ईशान्यां गत्वा पूर्ववत्कलशं विधाय । सुप्रतीकं दिग्गजं न्यस्य ॥ ओं सुप्रतीकाय नमः इति पू-
जनं ॥ ओं मंगलायै नमः ॥ इति संपूज्य ॥ वृषारूढं दक्षिणवामहस्तयोर्वरत्रिशूलधरं
त्रिनेत्रं शुक्लवर्णं ईशानं ध्यात्वा ॥ हे ह्यु ह विश्वेश्वर नत्रिशूलकपालखट्वांगगणे-
नसार्धं । लोकेन यज्ञेश्वर यज्ञसिद्ध्यै गृहाण पूजां भगवन्नमस्ते ॥ ओं ईशानेहागच्छे-
ह तिष्ठेति सांगादिमावाह्य ॥ श्वेतां सर्ववर्णां वा पताकां ध्वजं वा च तमीशानमित्यु-
कुर्यात् ॥ ओं त्रिशूलाय नमः ॥ पताकायां ॥ ओं सुप्रतिष्ठायै नमः ध्वजे । पूजयेत् ॥ ततस्त-
मीशानमिति मंत्रेण गंधादिभिः संपूज्य ॥ वृषस्कंधसमारूढः शूलहस्तस्त्रिलो-

४२

41

शिव॰
४२

सर्वाधियो महादेव ईशानः प्रभुरीश्वरः ॥ शूलपाणिर्विरूपाक्ष तस्मै नित्यं नमो नमः इति नत्वा ॥ सांगायेत्यादुक्त्वा ॥ ईशानायैतं
माषभक्तबलिं स० ॥ ततश्चाचम्येशानपूर्वयोर्मध्ये अधउद्दिश्य ॥ अनंतं शयनाशीनं कणास पूकमंडितं ॥ वज्रशंखधरो
र्ध्वाधो दक्षिणकरद्वयं गदाचक्रगदाधरोर्ध्वाधो वामकरद्वयं नीलवर्णं अनंतं ध्यात्वा ॥ एह्येहि पाताल धरामरेंद्र ना
गांगनाकिंनरगीयमान । यक्षोरगेंद्रामरलोकसंघैरनंत रक्षाध्वरमस्मदीयं ॥ भो अनंत इहागच्छेह तिष्ठेति सांगादि
मावाह्य । मेघवर्णां पताकां श्वेतां वा ध्वजं च ॥ नमोस्तु सर्पेभ्य इति मंत्रेण निकृत्य । आयं गौरिति मंत्रेण वा ॥ ॐ अनंताय
नम इति शेषं गंधादिरभ्यर्च्य ॥ यो सावनंतरूपेण ब्रम्हांडं सचराचरं ॥ पुष्पवज्जारयेन्मूर्ध्नि तस्मै नित्यं नमो नम इ
ति नत्वा ॥ सांगायेत्याद्युक्त्वा ॥ अनंतायैतं माषभक्तबलिं स० ॥ द्वितीयपक्षे नारायणमतेनैर्ऋत्यवरुणयोर्मध्ये अ
नंतस्य पूजा ॥ ततश्चाचम्य ॥ पश्चिम नैर्ऋत्ययोर्मध्ये ॥ ऊर्ध्व उद्दिश्य ॥ अक्षसूत्रकुशमुष्टिधरोर्ध्वाधो दक्षि
णकरं स्रुक् स्रुवकमंडलुधरोर्ध्वाधो वामकरद्वयं चतुर्मुखं जटिलं लंबोदरं रक्तवर्णं ब्रम्हा
णं ध्यात्वा ॥ एह्येहि सर्वाधिपते सुरेंद्र लोकेन सार्द्धं पितृदेवताभिः ॥ सर्वस्य धातास्यमितप्रभावो विशा
ध्वरं नः सततं शिवाय ॥ भो ब्रम्हन् इहागच्छेह तिष्ठेति । ब्रम्हाणं सांगादिमावाह्य । रक्तां पताकां र
क्तं ध्वजं च ॥ ब्रम्हजज्ञानमिति न्यस्य तेनैव मंत्रेण ब्रम्हाणं गंधादिभिरभ्यर्च्य ॥ पद्मयोनिश्चतुर्मूर्ति
र्वेदवासः पितामहः । यज्ञाध्यक्षश्चतुर्वक्त्रस्तस्मै नित्यं नमो नमः । इति नत्वा ब्रम्हाणं सांगादिमावाह्य

ब्रम्हणे एतं माषभक्तबलिं समर्पयामीति बलिं द
द्यात् ॥ अन्ये तु स्नानादध्यं वीति मंगलपवी
पूजयंति ॥ तेनैव ध्वजपताकां स्थापयंति ॥

४२

42

रूपनारायणम् सते ईशानपूर्वयोर्मध्ये तु ब्रम्हपूजितं ॥ ततआचम्य ॥ मंडपमध्ये ॥ षोडशहस्तदंडाग्रे प्रोत दशाह
स्तदीर्घं मूलभागे पंचहस्तविस्तृतं हस्तत्रय विस्तृतं वा चित्रवर्णं तु द्रघंटिकायुतमहाध्वजं ॥ इंद्रस्य त्वा
इतिमंत्रेण स्थापयेत् ॥ ब्रम्हजज्ञानमिति मंत्रेण ब्रम्हपूजनं कार्यं ॥ ततः मंडपषोडशस्तंभेषु सर्वे
भ्यो देवेभ्यो नमः ॥ [illegible] पन्नगेभ्यः । वर्णे [illegible] कु किन्नरेभ्यो नमः । इतिपूजयेत् ॥ इतिमंडपप्र
तिष्ठा ॥ ६ ॥ ततः पूर्वस्यां दिशि किंचिद्भू [illegible] । भिमुपलिप्य ॥ तत्रोपविश्य ॥ त्रैलोक्ये
यानि भूतानि स्थावराणि चराणि च । ब्रम्हविष्णुशिवैः सार्द्धं रक्षां कुर्वंतु तानि मे । देवदानवगंध
र्वा यक्षराक्षसपन्नगाः ॥ ऋषयो मनवो गावो देवमातर एव च ॥ सर्वे ममाध्वरे रक्षां प्रकु र्वंतु
मुदान्विताः ॥ ब्रम्हा विष्णुश्च रुद्रश्च क्षेत्रपालो गणैः सह ॥ रक्षंतु मंडपं सर्वं घ्नंतु रक्षांसि
सर्वतः ॥ ॐ त्रैलोक्यस्थेभ्यः स्थावरेभ्यो भूतेभ्यो नमः ॥ ॐ त्रैलोक्यस्थेभ्यश्चरेभ्यो भूतेभ्यो नमः ॥
ॐ ब्रम्हणे नमः । ॐ विष्णवे० ॥ ॐ शिवाय नमः ॥ ॐ देवेभ्यो नमः ॥ ॐ दानवेभ्यो नमः ॥ ॐ गंधर्वेभ्यो०
ॐ यक्षेभ्यो० ॐ राक्षसेभ्यो० ॐ पन्नगेभ्यो० ॐ ऋषिभ्यो० ॐ मनुष्येभ्यो० ॐ गोभ्यो नमः । ॐ देव
मातृभ्यो नमः ॥ इतिप्रत्येकं गंधादिनासंपूज्य ॥ ततः पूर्ववन्मंत्रैरेव ताभ्यां भूर्वै मा व व म्या प भक्त

ग्र० ॥ प्र० ॥ ८ ॥ ८ ॥ दि० ॥ ग्र० ॥ दि० ॥ ६० ॥ दि० ॥ ६

ततोयजमानः साचार्यः सऋत्विक् वृतालितैर्वाद्यैः वादित्रघोषैः प्राग्द्वारेण मंडपं प्रविशेत् ॥ आचार्यो द्वयोरपि प्राग्द्वारेणैव मंडपं प्रविशेयुः ॥ ततोयजमानोऽग्न्यायतनाद्दक्षिणत उपविशेत् ॥ आचार्यस्तु कुंड पश्चिमे उपविश्य आचम्य ॥ प्राणानायम्य अमुककरिष्यमाणकर्मणि अग्निप्रतिष्ठां करिष्ये ॥ तदंगसंमार्जनादिमेखलायोनिदेवतास्थापनपूजनादिकं करिष्ये ॥ इति संकल्प्याग्न्यायतनं त्रिभिः कुशैः संमृज्य ॥ गोमयोदकाभ्यामुपलिप्य सव्योत्तराभ्यां पाणिभ्यां स्फ्येन कुशैर्वा उल्लेखनं । ततो गुल्फानामिकाभ्यां पांसूनुद्धरेत् ॥ एवमुत्तरोत्तरयोः एवं प्रकारेण सम्मुल्लेखेत् ॥ एवं पंचभूसंस्कारान्कृत्वा ॥ कुंडेऽग्निस्थापनं कार्यं ॥ तद्यथा ॥ लौकिकाग्निं कांस्यपात्रे मृण्मयेन वा ॥ आनीयं कुंडाद्दक्षिणतः ॥ आग्नेय्यां स्थापिते ॥ आचार्यस्तमग्निं गृहीत्वा आग्नेयकोणमार्गेण कुंडमध्ये नीत्वा ॥ अग्निमूर्धेति मंत्रेण अग्निं दूतमिति मंत्रेण वा ॥ शीतमंडलनामानं ॥ अग्निं आत्माभिमुखं कुंडे प्रज्वलयेत् । ततस्त्वाग्नेर्नामग्रहणेन आवाहनं ॥ मनोज्योतिरिति प्रतिष्ठापयेत् ॥ अथाग्नेर्ध्यानं ॥ रुद्रतेजः समुद्भूतं द्विमूर्धानं द्विनासिकं ॥ षण्नेत्रं च चतुःश्रोत्रं त्रिपादं सप्तहस्तकं ॥ याम्यभागे चतुर्हस्तं सव्यभागे त्रिहस्तकं ॥ स्रुवं स्रुचं च शक्तिं च अक्षमालां च दक्षिणे । तोमरं व्यजनं चैव घृतपात्रं च वामके । बिभ्रतं सप्तभिर्हस्तैर्द्विमुखं सप्तजिह्वकं । दक्षिणं चतुर्जिह्वं त्रिजिह्वमुत्तरं मुखं ॥ द्वादशकोटिमूर्त्याख्यं द्विपंचाशत्कलायुतं । स्वाहां स्वधां व

खलायां श्वेतवर्णालंकृतायां विष्णुमावाहयेत् पूजयेत् । मध्यमेखलायां रक्त ११८ ॥

ब्रह्मारे रं कृतं मे यवाहनं ॥ रक्तमाल्यांबरधरं रक्तपद्मासनस्थितं ॥ रौद्रं त्वां ध्यावनामा वन्दि माकाहयाम्यहं ॥ लंमुखं सर्वदेवानां स

४२

वर्णीलंकृतायां ॥ ब्रम्हजज्ञानमिति ब्रम्हाणमावाहयेत् पूजयेच्च ॥२॥ अधोमेखलायां कृष्णवर्णीलंकृतायां इमारुद्रायेति
रुद्रमावाहयेत् पूजयेच्च ॥३॥ एवं कुंडे स्थंडिलेवा अग्निप्रणयनं विधाय ग्रहवेद्यां देवतास्थापनं कुर्यात् ॥
तत्रादौ ग्रहवेद्यां देवता सर्वतोभद्रदेवतास्थापनं पूजनं च ॥ तदर्थं आदौ सर्वतोभद्रयंत्रप्रकारो लिख्यते ॥
तद्यथा ॥ प्रागुदीच्यां गतारेखा कुर्यादेकोनविंशति । खंडेंदुश्रिपदे कोणे भ्रंटे मेखलाः पंचभिः पदैः ॥
एकादशपादवल्ली भद्रं तु नवभिः पदैः । चतुर्विंशत्यदावाप्यः परिधिर्विंशतिः पदैः । मध्ये षोडश
भिः कोष्ठैः पद्ममष्टदलं स्मृतं ॥ श्वेतं दुःश्रृंखलाः कृष्णाः वल्लीनीलेन पूरयेत् ॥ भद्रं रक्तं सिता वा
प्यः परिधिः पीतवर्णकं । वाप्यांतरदलं श्वेतं कर्णिका पीतवर्णिकाः ॥ परिध्यावेष्टितं पद्मं बाह्ये
सत्वरजस्तमैः ॥ तन्मध्ये स्थापयेद्देवान् ब्रम्हाद्यान् अमहासुरान् ॥ इति यंत्रोद्धारः ॥ अथ देव
तास्थापनं ॥ प्राणानायम्य देशकालौ स्मृत्वा सर्वतोभद्रमंडलदेवतास्थापनमहं करिष्ये । इति
सं० ॥ मध्ये कर्णिकायां ॥ ॐ ब्रम्हजज्ञानं ॥ ॐ ब्रम्हाणमावाहयामि ॥१॥ उत्तरे वाप्यां ॥ वायवी
नो प्रांतभागे ॥ आप्यायस्व० सोमं० ॥२॥ ईशान्यां खंडेंदौ ॥ तमीशानं । ईशानमा० ॥३॥ पूर्वे वाप्यां
त्रातारमिंद्रं । इंद्रमा० ॥ आग्नेय्यां खंडेंदौ ॥ अग्निं दूतं ॥ अग्निमा० ॥ दक्षिणे वाप्यां० । यमा

तवबा ॥ वायुमोवाहयामि ॥ वायुसोममध्ये भद्रे ॥ वसो पवित्रं ॥ ॐ ध्रुवमा० ॥ अध्वरं० सोमं० अप: अनिलं । अनंते । प्रत्यूषे ॥
पिनाकिने० । भुवनाधीश्वरं० । कपालिनं० । दिक्पतिः । स्थाणुं० । रुद्रं० । रुद्रं० । इत्येकादश रुद्रानावा० । ई
शानेंद्र मध्ये भद्रे ॥ प्राक्शानं० । भगं वरुणं० । सूर्यं वेदांगं० । भानुं । रविं० । गभस्तिं० । हिरण्यरेत
ना तेजस्व० । अश्विनो० ॥ अग्नियममध्ये भद्रे० । ॐ मासश्च सर्वलिधृतः ॥ सप्तैत्यकान् विश्वान्देवान् ॥ यमनैऋ
त्यमध्ये भद्रे ॥ अभित्यं देवं । सप्तयक्षाना० । नैऋतिवरुणमध्ये भद्रे । आयंगौः । भूतनागाना० वरुणवायु
ध्वरं । शूलं० । महाकालं आ० । ब्रह्मेशानमध्ये वल्लीषु ॐ धाताराति: । दक्षदानावा० ॥ ब्रह्मेंद्र वाव्यो० जातवे
दसे० । दुर्गा । तगैव इदं विष्णुर्म: ॥ विष्णुमावा० । ब्रह्माग्निमध्ये वल्लीषु । उदीरतां । स्वधामा० । ब्रह्मयमम
ध्येवाव्यां । परं मृत्यो अनु परेहि पंथां यस्ते अन्य इतरो देवयानात् । चक्षुष्मते शृण्वते ते ब्रवीमि मानः
प्रजां रीरिषो मोत वीरान् ॥ २ ॥ मृत्युं रोगाना० । ब्रह्मनैऋतिमध्ये वल्लीषु ॐ गणानां त्वा० गणपतिं
आवा० । ब्रह्मवरुणमध्ये वाव्यां । शन्नो देवी० । अप: आ० । ब्रह्मवायुमध्ये वल्लीषु । ॐ महतोयस्व० । म
रुतः आ० ब्रह्मणः पदम् लोकपालिकाधः । ॐ स्योना पृथिवि० पृथिवी: तगैव पंचनद्याः । स० । गं

२६

~~तर्क~~

४४

५५

तत्रैव धाम्नो धाम्नो धाराज० । सुप्तसागरान् ॥ ततो नाम्नाऽऽवाहनं ॥ कर्णिकोपरि । मेरुं । ० । वाह्यपरिधौ सोमादि समीप क्र

मेणायुधानि ॥ उत्तरादितु । गदां मो० । त्रिशूलं । वज्रं० । शक्तिं० । दंडं० । खड्गं । पाशं । अंकुशं० । तद्बाह्ये उत्तरादितः ॥ उ

त्तरादितु । गौतमं । भारद्वाजं । विश्वामित्रं । कश्यपं । अत्रिं । जमदग्निं । वसिष्ठं । अरुंधतीं चेति० । तद्बाह्ये पूर्वाद्युत्तरादि

तु ऐंद्री० कौमारीः । ब्राह्मी० चामुंडां० वैष्णवी० माहेश्वरीः वैनायकी चेति ॥ मध्ये सूर्यं ॥ ~~[illegible]~~

वाह्ये पूर्वाद्युत्तरादितु ॥ सोमं भौमं बुधं बृहस्पतिं शुक्रं शनी श्वरं राहुं केतुं चेति ~~[illegible]~~

ते एता देवताः प्रतिष्ठाप्य षोडशोपचारैः पूजयेत् ॥ इति सर्वतोभद्रदेवताः स्थापनं ॥ ६ ॥ तस्योपरि ग्रहयं

त्रवह्नं दत्वा ग्रहान्स्थापयेत् ॥ तत्रायं प्रयोगः ॥ अद्येत्यादि ग्रह पीठ देवता स्थापनमहं करिष्ये इति संकल्प्य ॥

प्रणवस्य ब्रह्मा ऋषिः परमात्मा गिन देवता देवीगायत्री दैवी उष्णिक् ~~[illegible]~~ देवी बृहती छंदांसि ।

सूर्याद्यावाहने वि० । केचित्तु तत्तन्मंत्रेण नाम्ना वा आवाहने आहुः ॥ तत्र ग्रह [illegible] पीठ मध्ये वर्तुले द्वाद

[illegible] ॥ [illegible] गुले मंडले प्राङ्मुखं सूर्यं रक्तपुष्पाक्षतैः ॥ आकृष्णेनेति हिरण्यस्तूप ऋषिः । त्रि

ष्टुप् छंदः स वितादेवता सूर्यावाहने विनियोगः ॥ ॐ आकृष्णेन रजसा० ॥ ॐ भूर्भुवः स्वः क

लिंगदेशोद्भव काश्यपसगोत्र सूर्य इहागच्छेत्यावाह्य । इह तिष्ठेति स्थापयेत् ॥ १ ॥

ततः आग्नेय्यां चतुरस्रे चतुरंगुले मंडले प्रत्यङ्मुखं सोमं श्वेतपुष्पाक्षतैः [illegible]

इमं देवा इत्यस्य वरुण ऋषिः यजुः सोमो देवता सोमावाहने वि० ॥ ~~[illegible]~~ इमं दे

ॐ इमं देवा०॥ ॐ भूर्भुवः स्वः यमुनातीरोद्भव आत्रेयसगोत्र सोम इहागच्छ इह तिष्ठ इति स्थापयेत्॥२॥ ततो द
क्षिणे त्रिकोणे त्र्यंगुलमंडले दक्षिणामुखं भौमं रक्तं कुर्यात् ततः॥ अग्निर्मूर्द्धेति विरूपाक्षऋषिः। गायत्रीछं०।
अंगारको देवता अंगारकावा०॥ ॐ अग्निर्मूर्द्धा०॥ ॐ भूर्भुवः स्वः अवंतीदेशोद्भव भारद्वाजसगोत्र मंगल
इहागच्छ त्यावाह्य। इह तिष्ठ इति स्थापयेत्॥३॥ ततः ईशान्ये बाणाकारे चतुरंगुले मंडले उदङ्मुखं बुधं
पीतं कुर्यात् ततः उद्बुध्यस्वेति परमेष्ठी ऋ० त्रि० बुधो देवता बुधावाहने वि०॥ ॐ उद्बुध्यस्व०। ॐ भूर्भुवः स्वः
मगधदेशोद्भव आत्रेयसगोत्र बुध इहागच्छ त्यावाह्य इह तिष्ठ इति स्थापयेत्॥४॥ ततः उत्तरे दीर्घ
चतुरस्रे षडंगुले मंडले उदङ्मुखं बृहस्पतिं पीतं कुर्यात् ततः॥ बृहस्पते अति यदर्य इति गृत्समद ऋषिः त्रि०
बृहस्पतिर्देवता बृहस्पत्यावाहने वि०॥ ॐ बृहस्पते॥ ॐ भूर्भुवः स्वः सिंधुदेशोद्भव आंगिरससगो
त्र बृहस्पते इहागच्छ त्यावाह्य इह तिष्ठ इति स्थापयेत्॥५॥ ततः पूर्वे पंचांगुले पंचकोणे मंड
ले प्राङ्मुखं शुक्रं शुक्लं कुर्यात् ततः अन्नात्परि स्रुत इति प्रजापतिः अश्विसरस्वती इन्द्रऋषयः।
अतिजग०। शुक्रो दे०। शुक्रावाहने वि०। ॐ अन्नात्परिस्रुतः। ॐ भूर्भुवः स्वः भोजकटदेशो
द्भव भार्गवसगोत्र शुक्र इहागच्छ त्यावाह्य इह तिष्ठ इति स्थापयेत्॥६॥ ततः पश्चिमे धनुः षडं
गुले मंडले प्रत्यङ्मुखं शनिं कृष्णं कुर्यात् ततः शन्नोदेवीरिति दध्यङ्गाथर्वण ऋषिः। गां
यत्रीछं०। शनिर्दे०। शन्यावाहने वि०॥ ॐ शन्नोदेवी०। ॐ भूर्भुवः स्वः सौराष्ट्रदेशोद्भव काश्यप
सगोत्र शनैश्चर इहागच्छ त्यावाह्य०। इह तिष्ठ
स्थापयेत्॥७॥ ततो नैर्ऋत्ये सूर्पाकारे द्वादशां
गुले मंडले दक्षिणामुखं राहुं कृष्णं कुर्यात्॥

४५
५५

ततः कयान इति वामदेव ऋ० गाय० राहुर्दे० राह्वावाहने वि०॥ ॐ कयानश्चि०॥ ॐ भूर्भुवः स्वः राठिनापुरो
द्भव पैठिनसगोत्र राहो इहागच्छ त्वावाह्य इह तिष्ठ तिष्ठ स्थापयेत्॥८॥ ततो वायव्ये ध्वजाकारे षडंगुले मंडले
दक्षिणामुखं केतुं धूम्रपुष्पाक्षतैः केतुं कृण्वन्निति मधुच्छंद ऋ० गाय० केतुर्दे० केत्वावाहने वि०॥ ॐ केतुं कृ
ण्वन्॥ ॐ भूर्भुवः स्वः अंतर्वेदिसमुद्भव जैमिनिसगोत्र केतो इहागच्छ त्वावाह्य इह तिष्ठ तिष्ठ स्थापयेत्॥ केतून् नव
हुते पिपूजादवेक दारूजनादि ॥९॥ यथोक्तकुसुमतंडुलानाम् अभावे यथा लाभोपपन्नैः कुसुमतंडुलैः स्थाप
येत्॥ सर्वे वा आदित्याभिमुखाः स्थाप्याः॥ इति मत्स्यपुराणे॥ अथाधिदेवताः सर्वाः श्वेतपुष्पतंडुले स्थापयेत्।
त्र्यंबकमिति वशिष्ठ ऋषिः अनु० रुद्रो दे० रुद्रस्थापने वि०॥ ॐ त्र्यंबकं॥ ॐ भूर्भुवः स्वः ईश्वर इहागच्छ त्वा
वाह्य इह तिष्ठ तिष्ठ स्थापयेत्॥ सूर्यदक्षिणपार्श्वे ईश्वरं॥१॥ श्रीश्चते इति नारायण ऋ० त्रि० उमा दे० उमा
स्थापने वि०॥ ॐ श्रीश्चते०॥ ॐ भूर्भुवः स्वः उमे इहागच्छ त्वावाह्य इह तिष्ठ तिष्ठ स्थापयेत्॥ सोमदक्षिण
वामपार्श्वे उमां०॥२॥ यदक्रंद इत्यस्य भार्गवो जमदग्नि दीर्घतमो ऋषयः त्रि० स्कंदो दे० स्कंदावाहने वि०॥
ॐ यदक्रंद०॥ ॐ भूर्भुवः स्वः स्कंद इहागच्छ त्वावाह्य इह तिष्ठ तिष्ठ स्थापयेत्॥ भौमदक्षिणपार्श्वे
स्कंदं॥३॥ विष्णोरराटमित्यस्य प्रजापति ऋ० यजुः विष्णुर्देवता विष्णवावाहने वि०॥ ॐ विष्णो
रराट॥ ॐ भूर्भुवः स्वः विष्णो इहागच्छ इह तिष्ठ तिष्ठ बुधदक्षिणपार्श्वे विष्णुं॥४॥ आ ब्रह्मन्निति प्रजा
पति ऋ० यजुः ब्रह्मा दे० ब्रह्मस्थापने वि०॥ ॐ आ ब्रह्मन्॥ ॐ भूर्भुवः स्वः ब्रह्मन् इहागच्छ इह तिष्ठ ति

ॐ सजोषा रुद्रेति विश्वामित्र ऋषि त्रि० इंद्रो देवता इंद्रस्थापने वि०॥ सजोषा इंद्रं०। ॐ भूर्भुवः स्वः इंद्र इहागच्छ इह तिष्ठ इति

प्रकस्य दक्षिणपार्श्वे इंद्रं ०॥६॥ यमाय त्वेति दध्यङ्ङाथर्वण ऋ० यजुः यमो देवता यमस्थापने वि०॥ ॐ यमाय त्वा०

ॐ भूर्भुवः स्वः यम इहागच्छ इह तिष्ठ इति प्राग्नेश्वर दक्षिणपार्श्वे यमं॥ ७॥ कार्षीरसीति प्रजापते० अनु० कालो दे०।

कालस्थापने वि०॥ कार्षिरसि० । ॐ भूर्भुवः स्वः काल इहागच्छ इह तिष्ठ इति स्थापयेत्॥ राहो दक्षिणपार्श्वे कालं॥

॥८॥ चित्रावसोइति ऋषय ऋषयः यजुः जगती छंदः। चित्रगुप्तो देवता चित्रगुप्तस्थापने वि०॥ ॐ चित्रा

वसो०। ॐ भूर्भुवः स्वः चित्रगुप्त इहागच्छ इह तिष्ठ इति केतोर्दक्षिणपार्श्वे चित्रगुप्तं॥९॥ ततः शुक्रात् पूर्वे

वामपार्श्वे इंद्राणीं॥६॥ ॐ प्रजापतेति हिरण्यगर्भ ऋ० त्रि० प्रजापतिर्दे० प्रजापतिस्थापने वि०॥ ॐ प्रजापते०॥ ॐ भूर्भुवः स्वः प्रजापते इहाग

ब्रह्मजज्ञानमिति प्रजापतिऋ० त्रि० ब्रह्मा देवता ब्रह्मस्थापने वि० ॥ ओं ब्रह्म जज्ञानं ॥ ओं भूर्भुवः स्वः भो ब्रह्मन् इहागच्छेह
तिष्ठेति केतुमालवर्षे ब्रह्माणं ॥१॥ ततः पुष्करवृत्या तत्रैव विनायकादि पंच देवताः स्थापयेत् ॥ ओं गणा
नां त्वेत्यस्य प्रजापतिः यजुः गणपतिर्दे० गणपतिस्थाप० ॥ ओं गणानां त्वा० ओं भूर्भुवः स्वः भो गणपते
इहागच्छेह तिष्ठेति राहुस्थानं चरतो गणपतिं ॥२॥ अंबे अंबिके इत्यस्य प्रजापतिऋ० अनु० दुर्गा दे० दुर्गा
स्थापने वि० ॥ ओं अंबे अंबिके० ओं भूर्भुवः स्वः दुर्गे इहागच्छेह तिष्ठेति शनैश्चरतो दुर्गां ॥ २॥ ओं आनो
नियुद्भिरित्यस्य वशिष्ठ ऋ० त्रि० वायुर्दे० वायुस्थापने वि० ॥ ओं आनो नियुद्भि ॥ ओं भूर्भुवः स्वः वायो इहा
गच्छेह तिष्ठेति रवेरुत्तरतो वायुं ॥ ३॥ ओं घृतं घृतपावान इति प्रजापतिऋ० चांपं त्रिष्टुप् छंदः आकाश
दे० आकाशस्थापने वि० ॥ ओं घृतं घृतपावानः ॥ ओं भूर्भुवः स्वः आकाश इहागच्छेह तिष्ठेति राहोर्द
क्षिणतो आकाशं ॥४॥ या वां कशेति मेधातिथिऋ० गायत्री० अश्विनौ देवता । अश्विनौ स्थाप० ॥ ओं
या वां कशा० । ओं भूर्भुवः स्वः अश्विनौ इहागच्छतं इह तिष्ठतमिति केतोर्दक्षिणे अश्विनौ स्थापये
त् ॥ पश्चाद् विनायकादि पंच देवता उत्तरत एव स्थापयेत् ॥ उत्तरे क्षेत्राधिपतिर्दे० क्षेत्राधिपतिस्था
पने वि० ॥ ओं नहि स्पशं ॥ ओं भूर्भुवः स्वः क्षेत्राधिपते इहागच्छेह तिष्ठेति स्थापयेत् ॥ वास्तोष्पत इत्यस्य व
शिष्ठ ऋ० त्रि० वास्तोष्पतिर्दे० वास्तोष्पतिस्थापने वि० ॥ ओं वास्तोष्पते । ओं भूर्भुवः स्वः वास्तोष्पते इहा
गच्छेह तिष्ठेति स्थापयेत् ॥ ततः इंद्रादीन् लोकपालान् सूर्याभिमुखान् स्थापयेत् ॥ शिष्टसमाचारेण

ॐ बृहस्पते अति यदर्यो ॥ ॐ भूर्भुवः स्वः अमइ० ॥ ३ ॥ ॐ प्रसुन्वे तमिति शिवस्यानू ऋ० त्रि० नैऋतिर्दे० निऋ
तिस्थापने वि० नि० ॥ ॐ प्रसुन्वे त० ॥ ॐ भू० ॥ ४ ॥ तत्वायामीति शुनः शेप ऋ० त्रि० वरुणो दे० व
रुणस्था० ॥ ॐ तत्वा० ॥ ॐ भूर्भुवः ॥ ५ ॥ आनो नियुद्भिरिति प्रजापति ऋ० त्रि० वायुर्दे० वायुस्था प०
ॐ आनो नियुद्भिः ॥ ॐ भूर्भुवः ॥ ६ ॥ वयं सोमेति गौतम ऋ० जगती० ईशानो दे० ईशानस्थाप०
ॐ तमीशानं० ॐ भूर्भुवः स्वः ईशान इहागच्छ इह तिष्ठेति स्थापयेत् ॥ ९ ॥ ततो नाममंत्रेण स्थापयेत् ॥
रवेः पूर्वे शेषं स्थापयेत् ॥ सोमस्याग्ने वासुकिं ॥ भौमस्याग्ने तक्षकं ॥ बुधोत्तरे कर्कोटकं ॥
बृहस्पते रग्ने पद्मं ॥ शुक्रोत्तरे महापद्मं । शनि पश्चिमे शंखपालं ॥ राहोः पुरतः कंबलं । केतोः
पुरतः कुलिकं ॥ ततो वहिर्भूगृहे पूर्वतः अश्विन्यादि सप्तनक्षत्राणि । विष्कुंभादि सप्तयोगाः ॥
बववालवकरणे । सप्तद्वीपानि । ऋग्वेदश्च दक्षिणे । पुष्यादि सप्तनक्षत्राणि । धृत्यादि सप्तयो
गाः ॥ कौलव तैतिलकरणे । सप्तसागराः ॥ यजुर्वेदश्च पश्चिमे । स्वात्यादि सप्तनक्षत्राणि ॥ वज्रादि
सप्तयोगाः ॥ गरवणिजकरणे ॥ सप्तपातालानि ॥ सामवेदश्चोत्तरे अभिजिदादिसप्तनक्षत्राणि ॥ साध्यादिषड्यो
गाः ॥ विष्टिकरणे भूराद्याः सप्तलोकाः ॥ अथर्ववेदश्च वायव्ये ध्रुवं सप्तऋषींश्च ॥ ततो यथावकाशं ॥ गंगादि
सप्तसरितः । सप्तकुलाचलाः । अष्टवसवः ॥ द्वादशादित्याः ॥ एकादशरुद्राः ॥ एकोनपंचाशन्मरुतः ॥
षोडशमातरः ॥ षड्ऋतवः । द्वादशमासाः । द्वेअयने । पंचदशतिथयः ॥ षष्टिसंवत्सराः । सुपर्णाः नागाः ।

सर्पाः । यक्षाः । गंधर्वाः ॥ विद्याधराः । अप्सरसः । रक्षांसि ।
भूतानि । मनुष्याः ॥ इत्येते स्थाप्याः ॥ ॐ मनोज्योतिः ॥
एवमेव प्रतिष्ठा ॥ इति प्रतिष्ठां विधाय पूजयेत् ॥ ६ ॥

तत्रादौ ग्रहध्यानं ॥ मत्स्यपुराणे ॥ पद्मासनः पद्मकरः पद्मगर्भसमद्युतिः ॥ सप्ताश्वरथसंस्थश्च द्विभुजः स्यात्स
सूर्य रविः ॥१॥ श्वेतः श्वेताम्बरधरो दशाश्वः श्वेतभूषणः ॥ गदापाणिर्द्विबाहुश्च कर्तव्यो वरदः शशीः
॥२॥ रक्तमाल्याम्बरधरः शक्तिशूलगदाधरः ॥ चतुर्भुजो मेषगमो वरदः स्याद्धरासुतः ॥३॥ पीतमा
ल्याम्बरधरः कर्णिकारसमद्युतिः । खड्गचर्मगदापाणिः सिंहस्थो वरदो बुधः ॥४॥ देवदैत्यगुरू त
द्वत् पीतश्वेतौ चतुर्भुजौ ॥ दण्डिनो वरदौ कार्यौ साक्षसूत्रकमण्डलुः ॥ इन्द्रनीलद्युतिः शूली
वरदो गृध्रवाहनः ॥ बाणबाणासनधरः कर्तव्योऽर्कसुतः सदा ॥७॥ क
रालवदनः खड्गचर्मशूलवरप्रदः ॥ नीलः सिंहासनस्थश्च राहुरत्र प्रशस्यते ॥८॥ धूम्रा द्विबाहवः सर्वे गदिनो विकृताननाः
गृध्रासनगता नित्यं केतवस्युर्वरप्रदाः । सर्वे किरीटिनः
कार्या ग्रहा लोकहितावहाः ॥ अङ्गुलेनोच्छ्रिताः सर्वे शत
मष्टोत्तरं सदा ॥९॥ विष्णुधर्मोत्तरे ॥ पंचवक्त्रो दशबाहुः प्रति
वक्त्रं त्रिलोचनः ॥ कपालशूलखड्गाङ्गी चंद्रमौली सदा शिवः ॥१॥
अक्षसूत्रं च कमलं दर्पणं च कमण्डलुं ॥ उमा बिभर्ति हस्तेषु पूजिता

धः करालास्यो नित्यशः ॥ विष्णुकौमोदकीपद्मशंखचक्रधरः क्रमात् ॥५॥ यज्ञोपवीती सिंहस्थ एकवक्त्रश्चतु
र्भुजः ॥ अक्षसूत्रं स्रुवं बिभ्रत्कुंडिकां च प्रजापतिः ॥६॥ चतुर्दंतगजारूढो वज्री कुलिशसत्करः ॥ प्राचीपतिः प्रक
र्तव्यो नानाभरणभूषितः ॥७॥ ईश्वत्तीनो यमः कार्यो दंडहस्तो द्विजाननः। रक्तदृक् पाशभृत्तद्वत् महिष
स्थो विभूषितः ॥८॥ कालः करालवदनो नित्यं मध्यन्ति भीषण ॥ पाशहस्तो दंडहस्तः सर्वत्र त्रिकरो भवा
न् ॥९॥ उदीच्यवेषां स्वाकारं द्विभुजं सौम्यदर्शनं। पुष्पकालोकनपरं चित्रगुप्तं विचिंतयेत् ॥१०॥ दक्षिणे ले
खनी तस्य वामे पत्रं तु कारयेत्। पिंगलश्मश्रुकेशांतः पिंगाक्षस्त्रितवो रुणः ॥११॥ ध्यानस्यासा
नं सूत्रस्य सद्धार्थिः शक्तिधारक ॥ विनिहितं च वरे पाशकमन्यं तु कारयेत् ॥१२॥ स्थापत्ती रूपधारि
एयः श्वेताम्रकरवाहन ॥ दधानो पाशकलशौ मुक्ताभरणभूषिताः ॥ मुक्तावर्णा महिकार्येषी दिव्या
भरणभूषिता ॥ चतुर्भुजा सौम्यवपुः चंडांशुसदृशांबरा ॥१३॥ रत्नपात्रं सव्यपाणौ पात्रमौषधिसंयुतं ॥
पद्मकरे च कर्तव्यं भूषायाद्वनंदनं ॥ दिङ्नागीनां च तुल्या साकार्या दृष्टगता तथा ॥१४॥ विष्णोर्व
ट्योर्लक्षणं प्रागुक्तं ॥१५॥ वामशश्च करे कार्यो सौम्या संतानमंजरी ॥ वरदा मंडिता कार्या द्विभुजा
च तथाश्विनी ॥१६॥ प्रजापतिलक्षणमपि प्रागुक्तं ॥ अक्षसूत्रधराः सर्वाः कुंडिकापुस्तसंयुताः। एक
भागाश्चिमोगावासर्पी कार्याश्चभीषणा ॥१८॥ पद्मासनस्थो जटिलो ब्रह्मा कार्यश्चतुर्मुखः
अक्षमालो स्रुकं बिभ्रत्पुस्तकं च कमंडलुं ॥१९॥ विनायकादिप्रतिमालक्षणानि विष्णुधर्मोत्तरे

शक्तिबाणं तथा शूलं खड्गं चक्रं च दक्षिणे ॥ चंद्रबिंबं मयो वामे खेटमूर्ध्वे कपालकं ॥ खट्वांगं च बिभ्राणा भुजाभूषा च
दिग्भुजा ॥ एषा देवी समुद्दिष्टा दुर्गा दुर्गार्तिहारिणी ॥ २ ॥ धावन्हरिणपृष्ठस्थो ध्वजधारी समीरणः ॥ वरदानकरो धू
म्रवर्णः कार्यो विजानता ॥ ३ ॥ नीलोत्पलाभं गगनं तद्वर्णं च वराधिपं ॥ चंद्रार्कहस्तं कर्तव्यं द्विभुजं सोम खंडवत् ॥ ४ ॥
द्विभुजौ देवभिषजौ कर्तव्यौ देहसंयुतौ ॥ तयोरेव षधयः कार्या दिव्या दक्षिणहस्तयोः ॥ ५ ॥ वामयोः पुस्तकौ कार्यो दर्शि
नीयो तथा द्विजो ॥ एकस्य दक्षिणे पार्श्वे वामे चास्य च पादप ॥ नारायुतं प्रकर्तव्यं सुरूपं चारुदर्शनं । रत्नभांडेकरैका
र्ये चंद्रमुक्तांबरे तथा ॥ ५ ॥ ततः षोडशोपचारैः पूजा ॥ ॐ आकृष्णेनेति पठित्वा ॥ ॐ सूर्याय नमः ॥ आवाहनं सम
र्पयामि ॥ ॐ सूर्याय इदमासनं ॥ ॐ सू० इदं पाद्यं ॥ ॐ सूर्या० एषवो र्घः ॥ ॐ सूर्या० इदमाचमनीयं ॥ ॐ सूर्याय०
पयसा सूर्यं स मर्पयामि ॥ ॐ सूर्या० दध्ना सूर्यं स्न० ॥ ॐ सू० आज्येन सूर्यं स्न० ॥ ॐ सूर्य० मधुना सूर्यं स्न० । ॐ सूर्य०
शर्करया सूर्यं स्न० । ॐ सूर्याय इदं शुद्धस्नानं समर्पयामि ॥ ॐ सू० इदं पुनराचमनीयं ॥ ॐ सू० इदं रक्तवस्त्रं० ॥ ॐ
सू० रक्तचंदनानुलेपनं स० ॥ ॐ सू० इमा निरक्तपुष्पाणि । इति पुष्पांजलित्रयं ॥ सू० एष धूपः ॥ सू० एष दी
पः ॥ ॐ सू० इदं नैवेद्यं० ॥ सू० इदं तांबूलं ॥ ॐ सूर्याय नमः इति नमस्कारः ॥ इति सूर्यं संपूज्य ॥ होमप्रकारे
णैव ह्यमाणस्वशाखीयमंत्रैः ॥ सोमाय नम इत्यादि चतुर्थ्यन्तनमोन्तेन नाममंत्रेण च सोमादीनपि नवग्रहा
तान् सुरान्पूजयेत् ॥ प्रयोगस्त्वेवं ॥ ॐ सोमाय नमः ॥ भौमाय नमः ॥ बुधाय नमः ॥ बृहस्पतये नमः ॥ शुक्रा
य नमः ॥ शनैश्चराय नमः ॥ राहवे नमः ॥ केतवे नमः ॥ अनेन प्रकारेण सूर्यादिनवग्रहपूजनं ॥ छ ॥

४९

49

अथाधिदेवता ॥ ईश्वराय नमः अयं गंधः ॥ इदं पुष्पं ई० ॥ अयं धूपः ई० ॥ अयं दीपः ई० ॥ इदं नैवेद्यं ॥ ई०

इति ईश्वर पूजनं ॥ एवं उमायै नमः ॥ स्कंदाय न
मः ॥ विष्णवे० ॥ ब्रह्मणे० ॥ इंद्राय० ॥ यमाय० ॥ का
लाय० ॥ ॐ चित्रगुप्ताय नमः ॥ अनेन प्रकारेण गं
धादि पंचोपचारैः ॥ अधिदेवता पूजनं ॥ एवमेव
प्रत्यधिदेवता पूजनं ॥ ॐ अग्नये नमः ॥ अद्भ्यो नमः ॥
धरायै नमः ॥ विष्णवे नमः ॥ इंद्राय नमः ॥ इंद्राण्यै नमः ॥ प्रजापतये नमः ॥ सर्पेभ्यो० ब्रह्मणे नमः ॥ अनेन
प्रयोगेण प्रत्यधिदेवता पूजनं ॥ एवमेव ॥ विनायकाय नमः ॥ दुर्गायै नमः ॥ वायवे नमः ॥ ॐ आकाशाय नमः
॥ अश्विभ्यां नमः ॥ अनेन प्रयोगेण अष्टौ लोकपाल पूजनं ॥ ॐ इंद्राय नमः ॥ अग्नये० ॥ यमाय० ॥ निर्ऋत
वे= ये० ॥ वरुणाय० ॥ वायवे० ॥ कुबेराय नमः ॥ ईशानाय० ॥ एतावत्य शक्तौ आवाहितादित्यादि देवताभ्यो न
मः ॥ इति मंत्रेण वा सर्वान् पूजयेत् ॥ सूर्यादीनां ग्रहाणां स्वस्व वर्णानि कुसुमानि अनुलेपनानि सुगंधी
नि ॥ शेषेभ्यश्च सितसुगंधि वस्त्रानुलेपनानि दातव्यानि ॥ धूपश्च गुग्गुल एव सर्वेभ्यो देयः ॥
वेद्युपरि विचित्रवर्ण शोभनं फलपुष्पयुतानं वितानकं देयं ॥ इदं वितानं फलपुष्पशोभितं

पा=४

ततोग्नहवेदीसमीपे भूमौ पूर्वलिखितमंत्रानुदीर्य्य पूजितदेवताभ्यो बलिदानं ॥ तद्यथा ॥ आकृष्णेनेति
पठित्वा सूर्याय एष गुडोदनबलिर्नम ॥ एवं घृतपायसं सोमाय ॥ मसुरान्नं कुजाय ॥ दध्योदनं बुधा
य ॥ दध्योदनं बृहस्पतये ॥ घृतोदनं शुक्राय । कृसरं शनीश्वराय । अजमांसं राहवे ॥ चित्रोदनं के
तुभ्य ॥ अन्येभ्यः पायसं । उक्तालाभे सर्वेभ्यो पि पायसं ॥ ततः सर्वेभ्यो भूरिभक्ष्याणि [illegible] नकादीन्द — क=४
द्यात् ॥ तद्यथा ॥ एतो नकक्षिकादी भूरिभक्ष्याणि नवग्रहादिभ्यो नम इति दद्यात् ॥ ततोग्नहादीशा — दु=६
न भाग[illegible] मयो बलिपे ॥ धात्वादिभिरक्तपीतसितासितासिते तंडुलैर्वा चतुर्विंशति
दलान्वितं सकर्णिकं कमल विलिख्य तस्य कर्णिकायां ह्रीं इति विन्यस्य ।
तदुपरि कलशं बहिर्द्ध्वजतत विभूषितं चंदनमालार्चितं पूर्वव
त्कलशं निदध्यात् ॥ तस्मिन्कलशे तत्वायामीति वरुणमावाह
येत् पूजयेच्च ॥ तत्वायामीति मुनः शेप ऋषिः त्रि० वरुणोदेव
ता वरुणावाहने वि० ॥ ॐ तत्वायामि० ॥ ततः कलशे गंगाद्यावाह
नं ॥ सर्वे समुद्राः सरितस्तीर्थानि जलदानदाः ॥ आयांतु यजमान
स्य दुरितः क्षयकारकाः ॥ ततः कलशाभिमंत्रणं ॥ कलशस्य ॥

५०

मुखे विप्रानु• श्रिताः ॥ ततः कलश प्रार्थना ॥ देवदानवसंवादे• प्रसन्नो भव सर्वदा ॥ इति ग्रह पीठ पूजनं ॥ ततो होमांग
रुद्र पीठ पूजनं ॥ तत्रादौ रुद्र पीठे लिंगतोभद्र देवता स्थापनं पूजनं च ॥ तत्रादौ लिंगतोभद्र रचनार्थं लिख्यते ॥ अ
थ लिंगतोभद्र प्रकारः ॥ चतुर्विंशति रालेख्या रेखाः प्राक् दक्षिणायताः ॥ कोणेषु षट् खलाः पंचपदा भूवल्यष्ट पार्श्वतः ॥
पदेन नवभिरालेख्या श्चतुर्भिर्लघु षट् खला ॥ लघुवल्यः पदे षड्भिः ततोष्टादशभिः पदैः ॥ कृत्वा लिंगानि वाप्यः
स्युस्त्रयोदशभिरंतरा ॥ ततो विंशति द्वयेनैव पीठं कुर्याद्विचक्षणः ॥ तस्य पादाः पंच पदा द्वाराण्यपि तथै
व च ॥ एकादशी पदं मध्ये पद्मस्वस्तिक भिष्यते ॥ कोणेषु षट् खलाः कार्याः पदैस्त्रिभिरतः परं ॥ पदैश्चतुर्भि
र्दिक्षु स्युर्भद्राण्यथ समं ततः ॥ एकोदशमता वल्यो मध्येष्ट दलमालिखेत् ॥ पद्मं षट् नवपदं ह्येवं लिंगतोभद्र
मिष्यते ॥ षट् खलाः कृष्णवर्णेन वल्ली नीलेन पूरयेत् ॥ रक्तेन षट् खला लघ्वः वल्लीः पीतेन पूरयेत् ॥ लिं
गानि कृष्णवर्णानि श्वेतेनाप्यथवापिका ॥ पीठं सपादं श्वेतेन पीतेन द्वारपूरणं ॥ मध्ये स्युः षट् खला रक्ता
वल्ली नीलेन पूरयेत् ॥ भद्राणि पीतवर्णानि पीता पंकजकर्णिका ॥ दलानि श्वेतवर्णानि पदं चित्रेण क
ल्पयेत् ॥ त्रिस्रो रेखा बहिः कार्याः सितरक्तादिनाः क्रमात् ॥ इति लिंगतोभद्र रचना प्रकारः ॥ अत्राद्ये
प्रागुक्ताः ब्रह्माद्याः सर्वतोभद्र मंडल देवताः स्थापयेत् ॥ अथ लिंगतोभद्र देवता स्थापनं ॥ प्राणानाय
म्य देशकालौ स्मृत्वा ॥ लिंगतोभद्र मंडल देवता स्थापनमहं करिष्ये ॥ इति संकल्प्य मध्ये ब्रह्मजज्ञा

प्रतिदिक्षु दलवाह्ये नाममंत्रैः ॥ ॐ इंद्राय नमः ॥ इंद्रमावाहयामि स्थापयामि पूजयामि नमः ॥ एवं सर्वत्र ॥
ॐ अग्नये नमः । अ० यमाय नमः । निर्ऋतये नमः । वरुणाय । वायवे नमः । सोमाय । ईशानाय नमः ।८।
ततः ईशान शंकादीनां मंतरालेषु ॥ ॐ अष्टौ वसुभ्यो नमः ॥ अष्टौ वसून् आ० । एकादश रुद्रान् २ द्वा
नौ= दशादित्यान् ३ ॐ अश्विनौ ४ विश्वान्देवान् ५ ॐ पितॄन् ६ ॐ नागान् ७ स्कंदं ८ वृषभं ९ ईशाना
दिदलेषु । ॐ दक्षाय० १ विष्णुं २ दुर्गां ३ स्वधाकारं ४ मृत्युरोगान् ५ समुद्रान् ६ सरितः ७ मरुतः ८ गं
गापतिं च ९ ॥ मध्ये पृथ्वीं ॥ तदुपरि मेरुं ॥ तदुपरि देवं स्थाप्य ॥ ततो मंडले वाह्ये पूर्वादिक्रमेण ।
ॐ वज्राय नमः । वज्रं आ० । ॐ शक्तये० दंडाय० खड्गाय० अंकुशाय० गदायै० । त्रिशूलाय० पुनः
पूर्वादि क्रमेण । ॐ ऐरावताय नमः ऐरावतं आ० ॐ मेषाय० महिषाय० प्रेताय० मकराय०
हिरण्याय० वृषभाय० ॥ पुनः पूर्वादिक्रमेणैव ॥ ॐ गौतमाय नमः । गौतमं आ० भरद्वाजा
य० विश्वामित्राय० कश्यपाय० जमदग्नये० । वशिष्ठाय० । ॐ अरुंधत्यै नमः ॥ पुनः पूर्वादि
क्रमेण ॥ ॐ आदित्याय नमः । आदित्यं आ० ॥ सोमं० भौमं० बुधं० बृहस्पतिं० शुक्रं० शनैश्चरं०
राहुं० केतुं च ॥ पुनः पूर्वादिक्रमेण ॥ ऐंद्रीं० । कौबेरीं० । ब्राह्मीं । वाराहीं० । चामुंडां० । वैष्णवीं
माहेश्वरीं० । वैनायकीं ॥ नाममंत्रैरेवावाहनगंधादिभिः पूजयेत् ॥ इति लिंगतोभद्रदेवता

यं=१

५२

ततस्तु वक्ष्ये रुद्रयंत्रपूजने ॥ तच्च यंत्रसाध्यमिति प्रथमं प्रोद्धारो लिख्यते ॥ तच्च स्कंदपुराणोक्तं ॥
प्रणम्य जगतामीशं [...] नुनादेहार्द्धधारिणं । यंत्रोद्धारं महं वक्ष्ये रुद्रे वद्ये कल्पानुसारतः ॥ मध्ये
वृत्तं समालिख्य तन्मध्ये च दशाक्षरं । बहिरष्टदलं पद्मं ततः षोडशपत्रकं ॥ चतुर्विंशतिपत्रा
ब्जं द्वात्रिंशत्पत्रकं तथा ॥ चत्वारिंशत्पत्रकं तु वृत्तं सूर्यसमप्रभं ॥ पंचपद्मात्मकं वृत्तं चतुर
स्रं च भूगृहं ॥ सत्वं रजस्तमश्चेति त्रिगुणैः परितो वृतं ॥ चतुर्द्वारं देशात् बहिर्नागसमावृतं ॥
रुद्रपीठमिति ख्यातं देवतास्तत्र विन्यसेत् ॥ चत्वारिंशच्छतं चैकं १४० देवतानामुदाहृतं ॥
क[...]का मध्ये देशे तु रुद्रं पंचास्यमालिखेत् ॥ ॐ नमो भगवते रुद्रायेति तारकादिकं न्य
सेत् ॥ सोयं दशाक्षरो मंत्रः ॥ सर्वकार्यार्थसिद्धिदः ॥ प्रणवादि नमोंतानि पंचास्या
नि ततः परं ॥ सद्योजातं वामदेवमघोरं तदनंतरं ॥ ततस्तत्पुरुषं प्रोक्तं ईशानं
पंचमं क्रमात् ॥ प्रधानमिदमाख्यातं प्र[...]य सावरणे ततः ॥ दलेष्वष्टसु नंद्या
दीन् पूर्वादिक्रमतो न्यसेत् ॥ पूज्यपूज[...]कयोर्मध्ये प्राचीस्याद्यंत्रलेखने ॥ आदौ
नंदी महाकालो गणेशो वृषभः क्रमात् ॥ अनंतरं भृंगिरिटिः स्कंदो माचंड संज्ञ

शिव. ५२

प. १०

षोड़शारे ततः पद्मे द्वितीयावरणे यजेत् । अनंतं च तथा सूक्ष्मं शिवं चैकपदं तथा ॥ एकरुद्रं त्रिमूर्तिं च
च श्रीकंठं वामदेवकं ॥ ज्येष्ठं श्रेष्ठं तथा रुद्रं कालं कलविकरणं ॥ बलं बलविकरणं बलप्रमथनं तथा ॥
तृतीयावरणे पद्मे चतुर्विंशद्दले तथा ॥ अणिमा महिमा चेति लघिमा गरिमा तथा ॥ प्राप्तिः प्राकाम्य
मीशित्वं वशित्वं चाष्टसिद्धयः ॥ ततः परं क्रमेणैव न्यसेद्ब्रह्मादिदेवताः ॥ ब्राह्मी माहेश्वरी चैव
न कौमारी वैष्णवी तथा । वाराही चैन्द्री च चामुंडा चंडिका चेति ताः क्रमात् ॥ ततोऽष्टस्वसितांगा
दीन् भैरवान् विन्यसेत् पुनः ॥ असितांगो रुरुश्चंडः क्रोध उन्मत्तभैरवः ॥ कालभीषण संहार
भैरवो ह्यष्ट कीर्तिताः ॥ द्वात्रिंशत्पत्रके पूर्वं भवाष्टकमुदाहृतं ॥ ततोऽनंतो वासुकिश्च
तक्षकश्च कुलीरकः ॥ कर्कोटकः शंखपालः कंबलोऽश्वतरस्तथा ॥ ततोऽष्ट
न्यः = सु[illegible] से हैहयं पृथुं [illegible] हयार्जुनं ॥ शाकुंतलेयं भरतं नलं राममिति क्रमात् ॥ है =
ततः कुलाचलानष्टौ दलेष्वष्टसु विन्यसेत् ॥ हिमवान्निषधो
विंध्यो माल्यवान् पारियात्रकः ॥ मलयो हेमकूटश्च गं
धमादनसंज्ञकः ॥ चत्वार्यावरणान्येवं पंचमावरणे त

इंद्राद्यष्टौ लोकपालान् षट्सु क्रमशो न्यसेत् ॥ इंद्रमग्निं यमं चैव निर्ऋतिं वरुणं तथा ॥ वायुं कुबेरमीशानं दले षट्सु विन्यसेत् ॥ इंद्रादिलोकपालानां अष्टौ शक्तीस्ततो न्यसेत् ॥ प्राची स्वाहा च वाराही खड्गिनी वारुणी तथा ॥ मृगारूढा च कौवेरी मलिनीच तथाष्टमी । ततोष्टानामायुधानि वज्रादीन्यष्टसु न्यसेत् ॥ वज्रं शक्तिं दंडखड्गौ पाशांकुशगदा अपि ॥ त्रिशूलं लोकपालानामायुधानि क्रमाल्लिखेत् ॥ ततोष्टौ वाहनान्येषामष्टसु क्रमतो लिखेत् । ऐरावतं तथा मेषं महिषं प्रेतसंज्ञकं ॥ मकरं च मृगं चैव नरं च वृषभं तथा । ऐरावतादयो ह्यष्ट दिग्गजास्तदनंतरं । ऐरावतं पुंडरीको वामनः कुमुदो जनः । पुष्पदंतः सार्वभौमः सुप्रतीकश्च दिग्गजाः । भूगृहांतः पुनर्लेख्याः पंचपंचात्मका वहिः ॥ इंद्रं विन्यस्य पूर्वस्यामाग्नेय्यामग्निमेवच । दक्षिणस्यां यमं चैव नैर्ऋत्यां निर्ऋतिं तथा ॥ प्रतीच्यां वरुणं वायुं वायव्यां विन्यसेत्ततः ॥ कुवेरं चैव कौवेर्यां ईशान्यामीशमालिखेत् । विरूपाक्षं तु विन्यसेदाग्नेय्यामग्नियोगतः ॥ नैर्ऋत्यां नैर्ऋतयोगे विश्वरूपं च विन्यसेत् ॥ वायव्यां वायुयोगे च लिखेत्पशुपतिं तथा ॥ ईशान्यामूर्ध्वलिंगं तु न्यसेदीशानयोगतः ॥ प्रागादिक्रमतो लेख्याः शेषाद्यष्टौ महाग्रहाः ॥ विप्रवर्णं श्वेतरूपं सहस्रफणसंयुतं ॥ शेषं विन्यस्य पूर्वस्यां पूजयेदुपचारकैः ॥ तक्षकं वैश्यवर्णं च नीलपं च शतैः फणैः ॥ युक्तमष्टांगकायं च आग्नेय्यां दिशि विन्यसेत् ॥ अनं

कर्कोटकं भूद्रवर्णं श्वेतं त्रिंशत्कलैर्युतं ॥ ईशान्यां दिशि विन्यस्य पूजयेद्विधिवत्ततः ॥ रुद्रपीठमिदं सर्वं रुद्र
कल्पेषु विश्रुतं । श्रीमुखाख्यमाख्यातं भक्तानुग्रहकारिणा ॥ कुंकुमागरकर्पूरै भूर्जपत्रे यथाविधि ॥ लिखितं
पूजितं भक्त्या सर्वकामार्थसिद्धिदं ॥ यं गमंत्रमयं प्रोक्तं मंगात्मा देवतेति च ॥ पूजनीयं प्रयत्नेन तेनेदं देवतामयं ॥
नास्ति चौरभयं तत्र न च राजभयं क्वचित् । यत्रेदं लिखितं यंत्रं पूज्यते विधिवत्सदा ॥ इति श्रीस्कंदपुराणे स्कंदम
हादेवसंवादे रुद्रयंत्रं ॥ अथ पूर्वपीठपूजामध्ये ॥ मूलप्रकृत्यै नमः ॥ ॐ आधारशक्त्यै नमः ॥ ॐ कूर्माय नमः ॥ ॐ अ
नंताय० ॐ पृथिव्यै० ॐ श्वेतद्वीपाय० ॐ कल्पवृक्षाय० ॐ रत्नमंडपाय० ॐ सिंहासनाय० इति मध्ये ॥ ततश्चा
ग्न्यादिदिक्षु ॥ ॐ धर्माय नमः । ॐ ज्ञानाय० ॐ वैराग्याय० ऐश्वर्याय० ततः आग्नेयादिकोणेषु ॥ ॐ अधर्माय०
ॐ अज्ञानाय० ॐ अवैराग्याय० ॐ अनैश्वर्याय० ॥ इति को० अथ मध्ये ॥ ॐ आत्मने नमः ॥ ॐ अंतरात्म
ने० ॐ ज्ञानात्मने० ॐ परमात्मने० ॐ अग्निमंडलाय० ॐ सोममंडलाय० ॐ सूर्यमंडलाय०
ॐ सं सत्वाय० ॐ रं रजसे नमः ॥ ॐ तं तमसे नमः । ॐ सर्वशक्तिधरा० कमलासनाय नमः ॥
अथ पूर्वादिदिक्षु ॥ ॐ वामायै नमः । ॐ ज्येष्ठायै० ॐ रौद्र्यै० । काल्यै० । कलविकरण्यै० । बलविकरण्यै० ॥
बलप्रमथिन्यै० । ॐ सर्वभूतदमन्यै नमः ॥ मध्ये ॐ मनोन्मन्यै नमः ॥ ततः पीठमंत्रेण पीठे
पुष्पांजलिं दद्यात् ॥ ॐ नमो भगवते सकलगुणात्मकशक्तियुक्ताय अनंताय योगपीठा
त्मने नमः ॥ इति पूर्वपीठपूजनं ॥ अथाग्न्युत्तारणं वह्नियागं च ॥ प्राणानायम्य देशकालौ
संकीर्त्य ॥ अस्याः श्रीभवानीशंकरमूर्तेः अग्न्युत्तारणं करिष्ये । इति संकल्प्यादौ दं

५३

53

स्वागतं देवदेवेशि विश्वरूप नमोस्तु ते । शुद्धे पित्त दधिक्षाने मधुपर्कमिः सह स्वतां ॥१॥ अस्यां संपूजयिष्यामि विश्वे
श्वर मनामयं । इदित्तं धूशे लज्जे दीपे अर्द्धि युक्ताभिमां कुरु ॥२॥ इति प्रार्थ्य ॥ ॐ समुद्रायत्वा० ॥ ॐ उपज्मन०
ॐ अग्नये वाकैवक० ॥ ॐ वाकैवकयाय० इत्यादिना जलेऽग्न्युत्तारणं कृत्वा ॥ अग्निर्मूर्द्धेति मंत्रेण द्वादश
वारं मदासंशोध्य ॥ ॐ यज्ञायज्ञाव इति कषायैः ॥ प्रसद्य भस्मनेति भस्मना ॥ इदं विष्णुरिति हरिद्रयोद
र्तनं ॥ घृतं घृतपावानइति घृतेनाभ्यंजनं ॥ ॐ या ओषधीरिति सर्वौषधीस्नानं ॥ यद्दूर्वेति गंधोदकस्ना
नं ॥ तत्सवितुरिति गोमूत्रेण० ॥ गंधद्वारेति गोमयेन० ॥ आप्यायस्वेति क्षीरस्नानं ॥ दधिक्राव्णेति दधिः ।
ते ओसी त्वाज्यं ॥ देवस्यत्वेति कुशोदकं ॥ ततः ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः ॥ अनेन हिरण्यगर्भे देहपाटवक
सर्वसुखे सर्वनिवासे अस्याः मूर्तेः सर्वांगेभ्यः प्रकाशात् । किंचित् किंचित् तां पदाहं शमय शमय श्री
त लुप्तां अंगावयव धातु पुष्कुरु कुरु ॥ ॐ सां सीं सूं सैं सौं सः ॥ ॐ यां यीं यूं यैं यौं यः ॥ स्वाहा अनेन मंत्रा
भिमंत्र्य ॥ आसनांतरे प्रतिष्ठां मांगं धादिभिः संपूज्य । आवाहनादिमुद्राः ॥ प्रदर्श्य ॥ ॐ हृदयाय न
मः । ॐ नमः शिरसे स्वाहा ॥ ॐ मंगं शिखायै वषट् । ॐ वं तेकवचाय हुं । ॐ हैं नेत्रत्रयाय वौषट्
॥ ॐ यैं अस्त्राय फट् ॥ इति षडंगानि प्रतिमायां विन्यस्य ॥ ततः चित्रं देवानामित्यर्द्धं त्वेन नेत्रोन्मी
लनं कुर्यात् ॥ इत्यग्न्युत्तारणं ॥ ततः अस्याः प्राणप्रतिष्ठामंत्रस्य ब्रह्माविष्णुमहेश्वरा ऋषयः । ऋ
ग्यजुःसामानि छंदांसि । चिद्रूपिणी प्राणशक्तिर्देवता ॥ आँ बीजं । ह्रीं शक्तिः । क्रों कीलकं ॥ अ
स्याः मूर्तेः प्राणप्रतिष्ठासिद्ध्यर्थे जपे विनियोगः ॥ ॐ ब्रह्मविष्णुरुद्रेभ्य ऋषिभ्यो नमः ॥ शिरसि ।

रु=५||||

अग्न्युः सामस्य ककुं दोस्थो नमो स्तुते ॥ चिद्रूपिणी प्राणशक्तिदेवतायै नमो हृदि ॥ ॐ आं बीजाय नमो नाभौ । ॐ ह्रीं
शक्तये नमो गुह्ये । ॐ क्रों कीलकाय नमः पादयोः ॥ इति भूतशुद्धिप्रकारोक्तं अंगन्यासं कृत्वा ॥ ॐ आं ह्रीं क्रों यं रं
लं वं शं षं सं हों हंसः ॥ अस्य प्राणाः इह प्राणाः पुनस्तान्येव बीजान्युच्चार्य अस्य जीव इह स्थितो जीवः । पुनस्तदंते सर्वेन्द्रिया
णि पुनः अस्य वाङ्मनश्चक्षुःश्रोत्रघ्राणसर्वेन्द्रियाणि इहागत्य सुखं चिरं तिष्ठंतु स्वाहा ॥ इति मंत्रेण सजीवं ध्यात्वा ।
देवं पट्टे इ षोडशावरणावृत्तीः कुर्यात् ॥ इति प्राणप्रतिष्ठां विधाय षोडशोपचारैः पूजयेत् ॥ आत्वावहंतु रथः
सुचेतसः श्वेतैरश्वैः सहकेतुमद्भिः वीताजिरैर्बलवद्भिर्मनोजवैरायाहि शीघ्रं मम हव्याय शर्वोम् । हृदयेतो देवानां
ऋषीणां मनुष्याणां च सर्वशः । सहस्राक्षं विरूपाक्षं महादेवं शिवं आवाहयामि ॥ ततो देवस्य मूर्तौ आत्मवद्दृशा
न्तरः ॥ ॐ नमो मंगं । वांतं । रुद्रं । यं । सद्योजातादि पंचवक्त्रन्यासमंत्र । सद्योजातं ॥१॥ वामदेवं ॥२॥ अघो
रेभ्यः ॥३॥ तत्पुरुषाय ४ ॐ ईशानाय । इति । ततो नमस्त इत्यावाहनं ॥ नमस्त इत्यस्य परमेष्ठी ऋषिः गा
यत्री छंदः । एकरुद्रो देवता आवाहने वि० ॥ द्वितीयो पवेशनं ॥ यातेरुद्रेति परमे० अनु० रुद्रो देवता उ
पवेशने वि० । याभिषुभितिमेवला नियोजनं परमेष्ठी रुद्रो नुष्टुप् । शिवेन वचसेत्यधिवासः ॥
परमेष्ठी० रनुष्टुप् रुद्रः । असौ यस्ताम्र इति देवतान्यासः ॥ परमेष्ठी पंक्ति रुद्रः । असौ यो वसर्पतीत्य
र्घसमर्पणं । मे परमेष्ठी रुद्रः । गायत्र्या अर्घ्यं दद्यात् ॥ ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि
तन्नो रुद्रः प्रचोदयात् ॥ ॐ भूरसीत्याचमनं प्रजापतिः प्रस्तार पंक्तिः स्वयमातृण्णा देवता ॥ पयः
पृथिव्यामित्यस्य लुशोधानक ऋषि । अनु० रुद्रो दे० पयसा स्नपने विनि० । ॐ पयः पृथिव्यां ॥
चंदनाद्यैः पंचोपचारान् कृत्वा ॥ ॐ भूर्भुवस्वरिति पूजासमर्पणं ॥ दधिक्राव्ण इति वामदेवो दधि

५८ पृ=

श॑र्करास्नानं॰॥ ॐ अवाऽरसं॥ पंचोपचारादि॥ (अपारस भिंद्र इति स्वस्ति ऋ॰। अनुष्टुप् छं॰।) ॐ नमस्ते रुद्रम
न्यव इत्यादिर्षि भिरष्टभिः कलशैः स्नपनं॥ तेषां परमेष्ठी ऋषिः प्रथमा गायत्री तिस्रोनुष्टु भस्तिस्रः
पंक्तयः अष्टभिः अनुष्टुप् एकरुद्रो देवता। स्नपने वि॰। आचमनं॥ प्रमुंच धन्वनः॥ परमेष्ठी॰ अनुष्टु॰
रुद्रो॰ कौपीनदाने वि॰। ततः सप्तसमुद्रावदर्शनं। आवाहनं। स्थापनं। सन्निधानं। सन्निरोधः। अवगुंठनं।
अमृतीकरणं। अर्घेण समर्पणं। ७। विज्यं धनुः परमेष्ठी॰ रुद्रो॰ नुष्टुप्॰ कपर्दिकाबंधने वि॰। नमो
हिरण्यबाहव इति वस्त्रसमर्पणं। परमेष्ठीयजुः हिरण्यबाह्वादयो देवता अस्त्रसमर्पणे वि॰॥ आचमनं।
ततोध्वनाव इत्युपवीते॥ परमेष्ठी॰ जगत्यादीनि छंदांसि। रुद्रो दे॰। उपवीतदाने वि॰। आचमनं॥
श्रयातेदेवेति इतिग्रहसमर्पणं॥ परमेष्ठी॰ अनुष्टुप्॰ रुद्रो दे॰ अस्त्रसमर्पणे वि॰॥ नमश्वभ्य इ
ति गंधं॥ परमेष्ठी॰ बृहती॰ रु॰। नमः पार्याय इति पुष्पं। परमेष्ठी॰ त्रि॰ रु॰ नमो वात्याय इति धू
पं॥ परमेष्ठी॰ त्रि॰ रु॰। नम आशव इति दीपं॥ परमेष्ठी॰ त्रि॰ रु॰। नमो ज्येष्ठाय इति नैवेद्यं। परमे॰ त्रि॰ रु॰। आ
चमनं॰॥ नमः शंभवाय इति तांबूलं॥ परमेष्ठि॰ जगत्यादीनि छंदांसि। रुद्रो दे॰। नमोध्वनाव इत्याराति
कं॥ परमेष्ठी॰ त्रिष्टुबादीनि छंदांसि। रुद्रो दे॰। ॐ नमः शंभवाय इति ललाटे शुक्लतंडुलैर्मालामंत्र
पूजयेत्। ॐ नमः शंभवाय इति मंत्रेण प्रदक्षिणादानं॥ अथ पंच वक्त्रपूजा॥ शुभ्राक्षततंदुलान् पंचपुंज
लोग्रहीत्वा। सद्योजातमिति जमदग्नि ऋषिः त्रि॰ ब्रह्मा देवता पंचवक्त्रपूजने वि॰॥ ए। हं॥

चव=२

शिव॰
५८

ॐ वामदेवाये त्पु(?)त्तरवक्त्र पूजा ॥ भारद्वाजो वार्हस्पत्य ऋषिः त्रि० विष्णुर्दे० उत्तरवक्त्र पूजने वि० ॥ २ ॥
यातेरुद्रेति परमे० अनु० दक्षिण वक्त्रं दे० ॥ दक्षिणवक्त्र पूजने वि० ॥ ३ ॥ तत्पुरुषेति नारायण ऋ० अ
नु० जगद्बीजपुरुषो दे० पूर्ववक्त्र पूजने वि० ॥ ४ ॥ तमीशानमिति गोतम ऋषिः जगतीछन्दः मध्यव
क्त्रं दे० मध्यवक्त्रपूजने वि० ॥ ५ ॥ ततो गन्धादिभिः । वामभागे गौरि(?)मर्चयेत् ॥ ॐ नमो भगवत्यूमा
देवि शंकर प्रिये पार्वति गौरि कालिका लिंदि(?) कोटरि विश्व धारिणी ह्रां ह्रीं गं गायै नम इति ॥ १ ॥
सद्योजातमिति सद्योजात ऋ० ब्रह्मा देवता । गायत्री० श्वेतवर्णं हंसवाहनं पश्चिमवक्त्रं पृ
थिवी तत्वं ब्रह्माणं(?) नमो हां ॥ इत्युत्थापनमुद्रा प्रदर्शनं ॥ सद्योजातमिति सद्योजात ऋषिः । उप
लो= रिष्टा(?)द्बृहती छन्दः ब्रह्मा देवता । कपिलो वर्णः । सद्योजातमिति मंत्रं पश्चिमवक्त्रं न्य
स्य पश्चिम पश्चिमवक्त्रं पूजयेत् ॥ ऋद्धिः सिद्धि धृतिर्मेधा लक्ष्मीकीर्तिः
क्षमा(?) ह्री(?) प्रभा । सद्योजातकला ह्येता अष्टौच परिकीर्तिताः ॥ एवमादौ(?)
तैः एवं तत्पश्चिमे(?) पूजयेद्धंसवाहनं ॥ सिद्ध्यंति सर्वकार्याणि पूजनात्तु न
संशयः ॥ कालेश्यामलयेति ध्यानं ॥ कालेश्यामल विंदु कुंद धवले ॥
श्री=

५५

55

गोक्षीरफेनप्रभं ॥ भस्माभ्यंगमनंगदेहदहनज्वालावलीलोचनं ॥ ब्रह्मेंद्रादिमरुद्गणैः स्तुतिपरै
रभ्यर्चितं योगिभिर्वंदेहं सकलं कलंकरहितं स्थाणोर्मुखं पश्चिमं ॥ १ ॥ वामदेवायेति वामदेव ऋषिः
त्रि० छं० विष्णुर्देवता ॥ सिंदूरवर्णं गरुडवाहनं उत्तरवक्त्रं आत्मतत्त्वविद्यायै वे नमः ॥ ह्रीं पद्ममुद्राप्रद
र्शनं ॥ वामदेवायेत्युत्तरवक्त्रं पूजयेत् ॥ रजो रक्ता रतिः पाल्या कामा संजीविनी क्रिया । बुद्धिः कार्या
धात्री भ्रामिणी मोहिनी स्वराः कलाः । तुलसीशतपत्रैश्च पूजयेद्गरुडध्वजे ॥ इति कलाः ॥ गौरं
कुंकुमेति ध्यानं ॥ गौरं कुंकुमपिंजरं सुतिलकं व्यापांडुगंडस्थलं ॥ भ्रूविक्षेपकटाक्षवीक्षणल
सत्संसक्तकर्णोत्पलं ॥ स्निग्धं बिंदुकलाधरं प्रहसितं नीलालकालंकृतं वंदे पूर्णशशांक
मंडलनिभं वक्त्रं हरस्योत्तरं ॥ अघोरेभ्य इत्यस्याघोर ऋषिः अनुष्टुप् छं० रुद्रो दे० कृष्णव
र्णं कूर्मवाहनं दक्षिणवक्त्रं तेजस्तत्त्वं रुद्ररूपाय नमो हुं ॥ ज्ञानमुद्राप्रदर्शनं ॥ अघोरेभ्य
इति हृदयेभ्यस्य दक्षिणवक्त्र पूजनं ॥ तमा मोहा क्षमा निद्रा मृत्युर्माया भया ज्वराः ॥ अ
घोरस्य कलाः ह्येता अष्टौ च परिकीर्तिताः । नीलोत्पलैः करवीरैश्च पूजयेत् कूर्मवाहनं ॥
इति कलाः ॥ कालाभ्रेति ध्यानं ॥ कालाभ्रभ्रमरांजनद्युतिनिभं व्यावृत्तपिंगेक्षणं । खं
डेंदुद्युतिमिश्रितं सुदशनप्रोद्भिन्नदंष्ट्रांकुरं ॥ सर्पप्रोतकपालशुक्तिशकलं व्याकीर्ण

माघोरवदं॥ वंदेद क्षिणमीश्वरस्यकुटिलंभ्रूभंगरौद्रं मुखं॥३॥ तत्पुरुषायेत्यस्य तत्पुरुषऋषिः गायत्री छंदः हैर्यी देवता। रक्तो वर्णः गौण्यवाहनं। पूर्वं वक्त्रं वायुतत्वं ह्रौं नमः॥ कवचमुद्राप्रदर्शनं॥ तत्पुरुषेति मुखेन्यस्य पूजा॥ निवृत्तिश्च प्रतिष्ठा च विद्याशांतिस्तथैवच॥ तत्पुरुषकलाख्येताश्चतस्रस्तु नसंशयः॥ दूर्वांकुरै रक्तपुष्पैः पूजयेद्गणवाहनं॥ आयुष्यं वर्द्धते तस्य विशिष्टफलदायकं॥ इतिकला॥ संवर्तेति ध्यानं॥ संवर्ताग्नितडित्प्रतप्तकनकप्रस्पर्द्धितेजोरुणं गंभीरध्वनिनिःसृतां मुद्रधान प्रोद्भासिताम्राधरं॥ अर्धेंदुद्युतिलोलपिंगलजटाभारप्रबद्धोरगं वंदे सिद्धसुरासुरेंद्रनमितं पूर्वंमुखं शूलिनः॥४॥ ईशानइत्यस्य ईशानऋषिः बृहतीछंदः सदाशिवो देवता। गौक्षीरवर्णः ऊर्ध्वदिक् खंतत्वं वृषभो वाहनं॥ आकाशतत्वं ज्ञानमुद्राप्रदर्शनं॥ ईशानस्वरूपं ह्रौं॥ ईशान इति मूर्द्धि विन्यस्य पूजा॥ शशिनी अंगदा इष्टा मरीची ज्वालिनीः कलाः॥ ईशानस्य कलाः पंच निरंजनपदानुगाः॥ हंसहंसेति यो ब्रूयाद्धंसो नाम सदाशिवः। बिल्वैः कनकपुष्पैश्च अन्यैश्च ऋतुफलैस्तथा॥ पूजनीयाः। सौख्यमोक्षप्रदायकाः॥ इतिकलाः। व्यक्ताव्यक्तेति ध्यानं॥ व्यक्ताव्यक्तगुणोत्तरं सुवदनं षड्विंशतत्वाधिकं तस्मादुत्तरतत्वमक्षरमिति ध्येयं सदा योगिभिः॥ वंदे तामसवर्जितेन मनसा सूक्ष्मातिसूक्ष्मं परं शांतं पंचममीश्वरस्य वदनं खंव्यातेजो

५६

५८

मय॥५॥ इति पंचवक्त्रपूजा॥ ततः कर्णिकायां॥ ॐ नमो भगवते रुद्राय इति दशाक्षरः॥ तद्बहिर्दिक्षु म
ध्ये एवं प्राच्यां॥ ॐ सद्योजाताय नमः॥ दक्षिणस्यां ॐ वामदेवाय नमः॥ प्रतीच्यां ॐ अघोराय नमः।
उत्तरस्यां॥ ॐ तत्पुरुषाय नमः॥ मध्ये॥ ॐ ईशानाय नमः॥५॥ तद्बहिः प्रागादिक्रमेण॥
ॐ नंदिने नमः। ॐ महाकालाय नमः॥ ॐ गणेश्वराय नमः॥ ॐ वृषभाय नमः॥ ॐ भृंगिरि
टये नमः॥ ॐ स्कंदाय नमः॥ ॐ उमायै नमः॥ ॐ चंडीश्वराय नमः ८॥ इति प्रथमावरणं॥ तद्ब
हिः षोडश दलेषु प्रागादिक्रमेण॥ ॐ अनंताय नमः। ॐ सूक्ष्माय नमः॥ ॐ शिवाय न०। ॐ
एकपदे नमः॥ ॐ एकरुद्राय नमः॥ ॐ त्रिमूर्तये नमः॥ ॐ श्रीकंठाय नमः॥ ॐ वामदेवाय नमः॥
ॐ ज्येष्ठाय नमः। ॐ श्रेष्ठाय०। ॐ रुद्राय०। ॐ कालाय नमः॥ ॐ कलविकरणाय नमः॥ ॐ ब
लाय नमः॥ ॐ बलविकरणाय नमः॥ ॐ बलप्रमथनाय नमः॥ १६॥ इति द्वितीयावरणं॥ तद्ब
हिश्चतुर्विंशति दले तृतीयावरणं॥ तत्र प्राच्यादिक्रमेण॥ ॐ अणिम्ने नमः। ॐ महि
म्ने नमः। ॐ लघिम्ने नमः॥ ॐ गरिम्णे नमः। ॐ प्राप्त्यै नमः। ॐ प्राकाम्यायै नमः॥ ॐ इशित्वा
य नमः। ॐ वशित्वाय नमः॥ ॐ ब्राह्म्यै नमः॥ ॐ माहेश्वर्यै नमः॥ ॐ कौमार्यै नमः॥

वा=

ॐ वैष्णव्यै नमः ॥ ॐ वाराह्यै नमः ॥ ॐ ऐन्द्र्यै नमः । ॐ चामुण्डायै नमः । ॐ चण्डिकायै नमः ॥ ॐ असिताङ्ग भैरवाय नमः ॥ ॐ रुरु भैरवाय नमः । ॐ चण्ड भैरवाय नमः । ॐ क्रोध भैरवाय नमः । ॐ उन्मत्त भैरवाय नमः । ॐ काल भैरवाय नमः । ॐ भीषण भैरवाय नमः । ॐ संहार भैरवाय नमः । २४ इति तृतीयावरणं ॥ तद्बहिः द्विर्विंशद्दले चतुर्थावरणं ॥ तत्र प्रागादिक्रमेण ॥ ॐ भवाय नमः । ॐ शर्वाय । ॐ ईशानाय । ॐ पशुपतये । ॐ रुद्राय । ॐ रुद्राय । ॐ उग्राय । ॐ भीमाय । ॐ महते । ॐ अनन्ताय । ॐ वासुकये । ॐ तक्षकाय । कुलीराय । ॐ कर्कोटकाय । ॐ शङ्खपालाय । ॐ कम्बलाय ॥ ॐ अश्वतराय । ॐ वैन्याय । पृथवे । ॐ हैहयाय । ॐ अर्जुनाय । ॐ शाकुन्तलेयाय । ॐ भरताय । ॐ नलाय । ॐ रामाय । ॐ हिमवते । ॐ निषधाय । ॐ विन्ध्याय । ॐ माल्यवते । ॐ पारियात्राय । ॐ मलयाय । ॐ हेमकूटाय । ॐ गन्धमादनाय । ३३ ॥ इति चतुर्थावरणं ॥ तद्बहिः अष्टाविंशद्दले पञ्चमावरणं ॥ तत्र प्रागादिक्रमेण ॥ ॐ इन्द्राय । ॐ अग्नये । ॐ यमाय । ॐ निर्ऋतये । ॐ वरुणाय । ॐ वायवे । ॐ कुबेराय । ॐ ईशानाय । ॐ शच्यै न । ॐ स्वाहायै । ॐ वाराह्यै । ॐ खड्गिन्यै । वारुण्यै । ॐ वायव्यै । ॐ कौबेर्यै । ॐ ईशान्यै । ॐ वज्राय । ॐ शक्तये । ॐ दण्डाय । ॐ खड्गाय । ॐ पाशाय नमः । ॐ अङ्कुशाय । ॐ गदायै । ॐ त्रिशूलाय । ॐ ऐरावताय । ॐ मेषाय । ॐ महिषाय । ॐ प्रेताय । ॐ मकराय ॥ ॐ हरिणाय । ॐ नराय । ॐ वृषभाय । ॐ ऐरावताय । ॐ पुण्डरीकाय । ॐ वामनाय । ॐ कुमुदाय । ॐ अञ्जनाय । ॐ पुष्पदन्ताय । ॐ सार्वभौमाय । ॐ सुप्रतीकाय । । ४० ॥ इति पंचमावरणम् ॥ ६५ ॥

५१

57

एवं पंच पद्मानि कृत्वा ॥ बहिश्चतुःकोणं चतुर्द्वारं भूगृहं ॥ ततः पूर्वे ॥ ॐ इंद्राय ॥ ॐ आग्नेयें । अग्नये । ॐ पिरूपा
क्षाय । दक्षिणे यमाय । निर्ऋत्यां । ॐ निर्ऋतये । विश्वरूपाय । ॐ पश्चिमे वरुणाय । वायवे वायव्याय । पशु
पतये । ॐ उत्तरे कुबेराय । ईशान्यां । ईशानाय । ॐ ऊर्ध्व लिंगाय नमः ॥ इति भूगृह मध्ये ॥ अथ भूगृहाद
हिः ॥ पूर्वस्यां । ॐ विश्ववर्णाय श्वेत रूपाय सहस्र कलामंडल भूषिताय शेषाय नमः ॥ आग्नेय्यां ॥ ॐ वैश्य
वर्णाय नीलरूपाय पंचशत कला मंडल भूषिताय तक्षकाय नमः ॥ दक्षिणस्यां ॥ ॐ विश्ववर्णाय कुंकुमाभाय
सहस्र कला मंडल युक्ताय अनंताय नमः ॥ नैर्ऋत्यां ॥ ॐ क्षत्रिय वर्णाय पीतरूपाय सप्तशत कला मंडल यु
क्ताय शंखपालाय नमः ॥ वायव्यां ॥ ॐ वैश्य वर्णाय नीलरूपाय पंच शत कलेण मंडल युक्ताय महाप
द्माय नमः ॥ कौबेर्यां ॥ ॐ शूद्रकेवर्णाय कृष्णरूपाय त्रिंशत्कला मंडल युक्ताय कंबलाय नमः ॥ ई
शान्यां ॥ ॐ शूद्रवर्णाय श्वेतरूपाय त्रिंशत्कला मंडल युक्ताय कर्कोटकाय नमः ॥ ॥ इति स्कंदा
नुसारेण रुद्रपीठदेवताः ॥ ततो नमो महद्भ्य इत्यादिभिर्मंत्रैः पुष्पांजलिर्देयः ॥ त्र्यंबकं यजाम
हे । नमस्तेस्तु भगवन् । राजाधिराजाय । सद्योजातं । वामदेवाय । अघोरेभ्यः । तत्पुरुषाय ।
शा= ईशानः स ॥ एभिर्मंत्रैः पुष्पांजलिं दद्यात् ॥ ततः प्रदक्षिण त्रयं कुर्यात् । अथ परुद्रस्तुतिः ॥ ज
य जय महाभैरव महा भीम मूर्ति भूषित मूल कुंडली कुंडलाकृत अति घन घन विलसित

गमोपनीयमानसुखकरनिकरपरिचयविरचितचतुरचरणभृंगारककरकमललालितकरालसद्विजासनविलासितसमस्तच
ण समस्तजगद्धितार संहारसंभार सन्नद्ध त्रिगुण निर्व्याधिकर परिणाम नीहार परिचार मरीचि चिर चिरव्यापार पाणी जलतुलि
त जटाजूट राशि भासमहर दुरितहर भ्रमर दिगंगना संभोग संगत गंभीरालंबितोत्तमांग भ्रू मध्य नयन मदन समद दमन
मधुकर संकाश निज भृंग सएव किं किंकिणी कणित ललित पदाहति क्षिन महामंडलाधार जय निस्तूयमान तांडवाडंबर
कारो धवल दैत्य दानवा संघात निरंतरांतरित शांतोतं करण स्वनवृंरत धराधर ध्वान गंभीर घर्घर गलगवय
उत्कार संस्त्रि भंगाहर गुहाराणि विराजमान धराधर कंन्याकांति संक्रांति निज कलेवरैकवेश अहिवलयज
लधीश महते मे नमस्ते नमस्ते ॥ ६ ॥ ततः रुद्रपीठादीशान्यां अव्रणं कालश वही दध्यक्षत विभूषितं चंदनमा
लाचर्चितं पूर्ववत्कलशं निदध्यात् ॥ इमा रुद्राये ति रुद्रमावाह्य पूजयेच्च ॥ तत्रैकं ब्राह्मणमुपविश्य सांगं
रुद्रं अन्यानि च रुद्रसूक्तानि पाठयेत्स्वैत् ॥ तत आचार्यः पश्चादग्नेरुपविश्य प्राणानायम्य देशकालौ स्मृ
त्वा । अमुक रुद्रा त्वोक कर्मणि होमम हं करिष्ये ॥ तत्रैवैकल्पिक स्मरणं ॥ पूर्वेण ब्रह्मणो गमनं । उत्तरे
ण पात्रीत्रासादनं ॥ द्वे पवित्रे तान्रमयी आज्यस्थाली ॥ पालाशः समिधः ॥ प्रोक्षणी घारौ ॥ समिद्ध
तमे आज्य भागौ । पूर्णपात्रं दक्षिणा । एतान्वैकल्पिक पदार्थीन हं करिष्ये ॥ अथ देवताभिध्यानं ॥ ६ ॥

व =

५८

58

